Entered 7-9-6-15
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No 1274.

तीर्थचिन्तामणिः ।

वाचस्पतिमिश्रविरचितः ।

5082

TIRTHACINTAMANI

OF

VĀCASPATI MISRA.



EDITED BY

KAMALAKRISHNA SMRITITIRTHA.

FASCICULAS II.

Calcutta,
PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
5, Nandakumar Choudhury's 2nd Lane.
AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.
1911.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	
*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ...	1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ...	1	14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each ...	5	10
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ...	14	6
Aitereya Lochana. ...	2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each ...	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/- ...	1	0
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each ...	1	4
Atmatattaviveka, Fasc. I. @ /10/ each ...	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each ...	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7; Vol. II. Fasc. 1-7 @ 1/ each ...	15	0
Bālam Bhaṭṭī, Vol. I, Fasc 1-2, Vol 2, Fasc. 1 @ /10/ each ...	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-3 @ /10/ each ...	3	12
*Bhāmatī, Fasc 4-8 @ /10/ each ...	3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each ...	4	6
Baudhyostatrasangraha ...	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each ...	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each ...	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each ...	3	2
Cri Cantinatha Charita, Fasc. 1-3 ...	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ...	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each ...	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each ...	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/ ...	3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-14 @ /10/ each ..	8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 Vol. IV. Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. 4, Fasc. 7-8. @ 1/4/ each ...	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/ ...	1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each ...	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each ...	3	12
Ditto Çankhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4; Vol 4, Fasc. 1 @ /10/ each ...	10	0
Çrī Bhāshyam, Fasc 1-3 @ /10/ each ...	1	14
Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each ...	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each ...	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each ...	3	2
Gobhiliya Grihya Sutra, Vol. 1 @ /10/ each ...	3	2
Ditto Vol. II, Fasc. -2 @ 1/4/ each ...	2	8
Ditto (Appendix) Gobhila Parisista ...	2	0
Ditto Grihya Sangraha ...	0	10
Haralata ...	1	14
Karmapradiph, Fasc. I ...	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each ...	4	6
Kātantra, Fasc. 1-6 @ /12/ each ...	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ...	17	8
*Kūrma Purāṇa, Fasc. 8-9 @ /10/ each ...	4	6
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each ...	3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each ...	6	14
Mahā-bhāṣya-pradīpōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each ...	19	6
Ditto Vol. IV, fasc. I @ 1/4 ...	1	4
Manuṭīkā Sangraha, Fasc. 1-3 @ /10/ each ...	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each ...	9	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गत्वा तत्र [1]जपेत्तत्त्वं नरसिंहं तमव्ययम्।
ततःस्त्रीणां सहस्राणि वीणाचामरकर्म्मणाम्॥
निर्गच्छन्ति पुरो विप्राः स्वागतं ता वदन्ति च।
प्रवेशयन्ति तं हस्ते गृहीत्वा साधकेश्वरम्।
ततो रसायनं दिव्यं पाययन्ति द्विजोत्तमाः॥
पीतमात्रे दिव्यदेहो जायते सुमहाबलः।
क्रीड़ते दिव्यकन्याभिर्यावदाहूतसंप्लवम्॥
भिन्नदेहो वासुदेवे लीयते नात्र संशयः।
यथा न रोचयेद्वासं तथा निर्गच्छते पुनः॥
पट्टं शूलञ्च खड्गञ्च रोचनाञ्च मणिन्तथा।
रसं रसायनञ्चैव पादुकाञ्जनमेव च॥
कृष्णाजिनं मुनिश्रेष्ठाः [2]गुण्डिकाञ्च मनःशिलाम्।
कमण्डलुञ्चाक्षसूत्रं षष्टीं[3] सञ्जीवनीन्तथा॥
सिद्धविद्याञ्च शास्त्राणि गृहीत्वा साधकोत्तमः।
ज्वलद्वह्निस्फुलिङ्गोर्म्मिवेष्टितं त्रिशिखं हृदि॥
सकृन्न्यस्तं दहेत् सर्व्वं वृजिनं जन्मकोटिजम्।
विषे न्यस्तं विषं हन्यात् कुष्ठं हन्यात्तनौ स्थितम्॥
स्वदेहे भ्रूणहत्यादि कृत्वा दिव्येन शुध्यति।
महाग्रहगृहीतेषु ज्वलमानं विचिन्तयेत्॥

---

(१) क ख पुस्तकद्वये शक्तिम्।
(२) घ पुस्तके गुटिकाञ्च मनोहराम्।
(३) ग पुस्तके यष्टिम्। घ पुस्तके विद्याम्।

State Museum Library Lucknow 5082

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हृदन्ते वै ततः शीघ्रं नश्येयुर्दारुणा ग्रहाः।
बालानां कण्ठके बद्धं रक्षा भवति नित्यशः॥
गण्ड-पिण्डक-लूतानां नाशनं कुरुते ध्रुवम्।
[1]व्याधिघाते समिद्भिश्च घृतक्षीरेण होमयेत्॥
त्रिसन्ध्यं मासमेकन्तु सर्व्वरोगान् विनाशयेत्।
असाध्यं नास्य पश्यामि तत्त्वस्य सचराचरे॥
यां यां कामयते सिद्धिं तां तां प्राप्नोति स ध्रुवम्।
अष्टोत्तरशतन्त्वेकं पूजयित्वा मृगाधिपम्॥
मृत्तिकाः सप्त वल्मीके श्मशाने च चतुष्पथे।
रक्तचन्दनसंमिश्रा गवां क्षीरेण लेपयेत्॥
सिंहस्य प्रतिमां [2]कृत्वा प्रमाणेन षडङ्गुलाम्।
विशेषेण भूर्ज्जपत्रे रोचनया समालिखेत्॥
नरसिंहस्य कण्ठे तु बद्धा चैव हि मन्त्रवित्।
जपेत् संख्याविहीनन्तु पूजयित्वा जलाशये॥
सप्ताहं यावन्मन्त्रन्तु जपते संयतेन्द्रियः।
जलाकीर्णा मुहूर्त्तेन जायते सर्व्वमेदिनी॥
अथवा शुष्कवृक्षाग्रे नरसिंहन्तु पूजयेत्।
जप्ता चाष्टशतं तत्त्वं वर्षन्तं विनिवारयेत्॥
तमेवं पिञ्जि(ञ्ज)के बद्धा भ्रामयेत् साधकोत्तमः।
महावातो मुहूर्त्तेन आगच्छेन्नात्र संशयः॥

---

(१) घ पुस्तके व्याधिजाते।
(२) क ख पुस्तके दृष्ट्वा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनश्च धारयेत् सिक्तां सप्त(ज)सप्तेन वारिणा ।
अथ तां प्रतिमां द्वारि निखनेद् यस्य साधकः ॥
[1]गोत्रोत्पादो भवेत्तस्य उद्धृते चैव शान्तिदः ।
तस्मात्तं मुनिशार्दूला भक्त्या सम्पूजयेत् सदा ॥
मृगराजं महावीर्य्यं सर्व्वकामफलप्रदम् ।
दृष्ट्वा स्तुत्वा नमस्कृत्वा सम्पूज्य नरकेशरीम् ।
प्राप्नुवन्ति नरा राज्यं स्वर्गं मोक्षञ्च दुर्लभम् ॥
नरसिंहं नरो दृष्ट्वा लभेदभिमतं फलम् ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकञ्च गच्छति ॥
सकृद्दृष्ट्वा तु तं देवं भक्त्या सिंहवपुर्धरम् ।
मुच्यते कल्मषैः सर्व्वैः[2]र्जन्मकोटिसमुद्भवैः ॥
संग्रामे सङ्कटे दुर्गे चौरव्याघ्रादिपीड़िते ।
कान्तारे प्राणसन्देहे विष-वह्नि-जलेषु च ॥
राजादिभ्यश्च [3]संग्रामे ग्रहरोगादिपीड़िते ।
स्मृत्वा तं पुरुषः सर्व्वैरापदैश्च प्रमुच्यते ॥
सूर्य्योदये यथा नाशं तमोऽभ्येति महत्तरम् ।
तथा सन्दर्शने तस्य विनाशं यान्त्युपद्रवाः ॥
गुण्डिकाञ्जनपातालपादने [4]परमालयम् ।
नरसिंहे प्रसन्ने तु प्राप्नोत्यन्यांश्च वाञ्छितान् ॥

---

(१) ग पुस्तके गोत्रोत्साहः ।
(२) घ पुस्तके चाशुभैर्दुःखैः ।
(३) ख पुस्तके समुद्रेभ्यः ।
(४) मूलपुस्तके—पादुके च रसायनम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यान् यान् कामानभिध्यायन् भजते नरकेशरीम् ।
तान् तान् कामानवाप्नोति नरो नास्त्यत्र संशयः ॥

प्रकृतमाह—

दृष्ट्वा तं देवदेवेशं भक्त्या पूज्य प्रणम्य च ।
दशानामश्वमेधानां फलं दशगुणं लभेत् ॥
पापैः सर्व्वैर्विनिर्म्मुक्तो गुणैः सर्व्वैरलङ्कृतः ।
सर्व्वकामसमृद्धात्मा जरामरणवर्ज्जितः ॥
सौवर्णेन विमानेन किङ्किणीजालमालिना ।
सर्व्वकामसमृद्धेन कामगेन सुवर्च्चसा ॥
तरुणादित्यवर्णेन मुक्ताहारावलम्बिना ।
दिव्यस्त्रीशतयुक्तेन दिव्यगन्धर्व्वनादिना ॥
कुलैकविंशमुद्धृत्य देववन्मुदितः सुखी ।
स्तूयमानोऽप्सरोभिश्च विष्णुलोकं व्रजेन्नरः ॥
भुक्त्वा तत्र वरान् भोगान् विष्णुलोके द्विजोत्तमः ।
गन्धर्व्वैरप्सरैर्युक्तः कृत्वा रूपं चतुर्भुजम् ॥
[1]समाह्लादकरं सौख्यं यावदाहूतसंप्लवम् ।
पुण्यक्षयादिहायातः प्रवरे योगिनां कुले ॥
चतुर्व्वेदी भवेद्विप्रो वेदवेदाङ्गपारगः ।
वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् ॥

तथाच तत्रैव ब्रह्मोवाच—

अनन्ताख्यं वासुदेवं दृष्ट्वा भक्त्या प्रणम्य च ।

(१) क ख पुस्तकद्वये मनो।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वपापविनिर्म्मुक्तो नरो याति परं पदम् ॥
सर्व्वलक्षणसंयुक्तं पुण्डरीकायतेक्षणम् ।
[1]श्रीवत्सोरस्कसंयुक्तं सुप्रसन्नं चतुर्भुजम् ॥
वनमालावृतोरस्कं मुकुटाङ्गदधारिणम् ।
पीतवस्त्रं सुपीनांसं कुण्डलाभ्यामलङ्कृतम् ॥
श्वेतगङ्गां नरः स्नात्वा यः पश्येत् श्वेतमाधवम् ।
मत्स्याख्यं माधवञ्चैव श्वेतद्वीपं स गच्छति ॥

मुनय ऊचुः ।

श्वेतमाधवमाहात्म्यं वक्तुमर्हस्यशेषतः ।
विस्तरेण जगन्नाथ प्रतिमां तस्य वै हरेः ॥

तथा तत्रैव ब्रह्मोवाच ।

अभूत् कृतयुगे विप्राः श्वेतो नाम महाबली ।
स गत्वा परमं क्षेत्रं सागरं दक्षिणाश्रयम् ॥
श्वेतोऽथ कारयामास प्रासादं शुभलक्षणम् ।
[2]धन्वन्तरशतञ्चैकं देवदेवस्य दक्षिणे ॥
ततः श्वेतेन विप्रेन्द्राः श्वेतशैलमयेन तु ।
कृतः स भगवान् श्वेतमाधवश्चेन्दुसन्निभः ॥

श्वेतो नाम राजा—तं प्रति भगवद्वाक्यम् ।

कुशाग्रेणापि राजेन्द्र श्वेतगाङ्गेयमम्बु च ।
स्पृष्ट्वा स्वर्गं गमिष्यन्ति मद्भक्ता ये समाहिताः ॥

---

(१) क ग पुस्तकद्वये श्रीवत्सोरसि ।

(२) क ख पुस्तके मन्वन्तरशतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्त्विमां प्रतिमां गच्छेन्माधवाख्यां शशिप्रभाम्।
शङ्ख-गोक्षीरसङ्काशामशेषाघविनाशिनीम्॥
तां प्रणम्य सकृद्भक्त्या पुण्डरीकनिभेक्षणाम्।
विहाय सर्व्वलोकान् वै मम लोके महीयते॥
मन्वन्तराणि तत्रैव देवकन्याभिरावृतः।
गीयमानश्च मधुरं सिद्धगन्धर्व्वसेवितः॥
भुनक्ति विपुलान् भोगान् यथेष्टं मामकैः सह।
च्युतस्तस्मादिहागत्य मनुष्यो ब्राह्मणो भवेत्॥
वेदवेदाङ्गवित् श्रीमान् भोगवान् चिरजीवितः।
गजाश्वरथशालाढ्यो धनधान्यावृतः शुचिः।
रूपवान् [1]बहुभाग्यश्च पुत्रपौत्रसमन्वितः॥
पुरुषोत्तमं पुनः प्राप्य वटमूलेऽथ सागरे॥
त्यक्त्वा देहं हरिं स्मृत्वा ततः शान्तं पदं व्रजेत्।
श्वेतमाधवमालोक्य समीपे मत्स्यमाधवम्॥
एकार्णवे जले पूर्व्वं रोहितं रूपमास्थितम्।
वेदानां हरणार्थाय रसातलतले स्थितम्॥
चिन्तयित्वा श्वेतमत्स्यं कस्मिन् स्थाने व्यवस्थितम्।
आद्यावतरणं रूपं माधवं [2]मत्स्यरूपिणम्॥
प्रणम्य प्रयतो भूत्वा सर्व्वान् दुःखान् विमुञ्चति।
प्रयाति परमं स्थानं यत्र देवो हरिः स्वयम्॥

---

(१) घ पुस्तके—भार्य्यश्च।

(२) ग पुस्तके—श्राद्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालै पुनरिहायातो राजा स्यात् पृथिवीतले।
मत्स्यमाधवमासाद्य दुराधर्षो भवेन्नरः॥
दाता भोक्ता भवेद्यज्वा वैष्णवः सत्यसङ्गरः।
योगं प्राप्य हरेः पश्चात् ततो मोक्षमवाप्नुयात्॥
मत्स्यमाधवमाहात्म्यं मया सम्परिकीर्त्तितम्।
यं दृष्ट्वा मुनिशार्दूलाः सर्व्वान् कामानवाप्नुयात्॥

तत्रैव—ब्रह्मपुराणे मुनय ऊचुः।

भगवन् श्रोतुमिच्छामो मार्ज्जनं वरुणालये।
क्रियते स्नानदानादि तस्याशेषफलं वद॥

ब्रह्मोवाच।

शृणुध्वं मुनिशार्दूला मार्ज्जनञ्च यथाविधि।
भक्त्या तु तन्मना भूत्वा पुराणं पुण्यमुक्तिदम्॥
मार्कण्डेयह्रदे स्नानं सर्व्वकालं प्रशस्यते।
चतुर्द्दश्यां विशेषेण सर्व्वपापप्रणाशनम्॥
तद्वत् स्नानं समुद्रस्य सर्व्वकालं प्रशस्यते।
पौर्णमास्यां विशेषेण हयमेधफलं लभेत्॥
मार्कण्डेयं वटं कृष्णं रौहिणेयं महोदधिम्।
इन्द्रद्युम्नसरश्चैव पञ्चतीर्थीविधिः स्मृतः॥

एका यात्रा अयमत्र प्रयोगः।

[ॐ अद्य ज्येष्ठशुक्लद्वादश्यां विष्णुलोकप्राप्तिपूर्व्वक-तदप्रच्यवनकामः पुरुषोत्तमदर्शनमहं करिष्ये। यद्वा—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्यैष्ठशुक्लैकादश्यां कृतोपवासो द्वादश्यामुदिते रवौ—][१]

ॐ अद्य ज्यैष्ठशुक्लद्वादश्यां कुरुक्षेत्राधिकरणकनिराहार-जितेन्द्रियजितक्रोधकर्त्तृकसप्तसंवत्सरायुतावच्छिन्नैकपादतपश्चरण-जन्यफलाधिकफलप्राप्तिकामः सोपवासः पुरुषोत्तमदर्शनमहं करिष्ये।

यद्वा पञ्चतिर्थि-विधिना पश्येत्। तद्यथा—

पूर्व्ववत् सोपवासो मार्कण्डेयसरो गत्वा कृतस्नानादिः कुश-तिल-जलान्यादाय—ॐ अद्य दशाश्वमेधजन्य[२]फलसमफलप्राप्ति-सर्व्वपापविनिर्मुक्ति-शिवलोकगमन-तदधिकरणकयावदाहूतसंप्लव-वरबहुभोगोपभोगपूर्व्वकैतल्लोकाधिकरणकबहुश्रुतब्राह्मणत्वभवन-तदुत्तरशाङ्करयोगप्राप्तिपूर्व्वकमोक्षावाप्तिकामो मार्कण्डेयह्रद-स्नानपूर्व्वकमार्कण्डेयेश्वरदर्शनमहं करिष्ये। इति सङ्कल्पः।

तत्र स्वशाखोक्तविधिना तदस्नाने साधारणेन पौराणिक-विधिना स्नायात्। ततो नैरन्तर्य्येणैव—

ॐ संसारसागरे मग्नं पापग्रस्तमचेतनम्।
त्राहि मां [३]भगवन्नत्र त्रिपुरारे नमोऽस्तु ते॥
नमः शिवाय शान्ताय सर्व्वपापहराय च।
स्नानं करोमि देवेश मम नश्यतु पातकम्॥

इति मन्त्रेण तत्रोदङ्मुखस्त्रिर्मज्जेत्।

---

(१) [ ] चिह्नितांशः ख पुस्तके नास्ति।

(२) ग पुस्तके—यज्ञ।

(३) ग पुस्तके—भगनेतघ्न।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततो नाभिमात्रे जले यवाद्भिर्देवादीन् सतिलाद्भिः पित्रादीं-स्तर्पयित्वा उत्तीर्य्य धौते वाससी परिधाय, मृद्वारिभ्याम् ऊरू-जङ्घे च प्रक्षाल्याचम्य शिवालयं प्रविश्य, शिवं प्रदक्षिणीकृत्य—"ॐ नमः शिवाय" इति मूलमन्त्रेण त्रिःसम्पूज्य पञ्चोपचारान् कृत्वा प्रणिपत्य—

ॐ त्रिलोचन नमस्तेऽस्तु नमस्ते शशिभूषण ।
त्राहि मां त्वं विरूपाक्ष महादेव नमोऽस्तु ते ॥

इति पठित्वा प्रसाद्य—"भगवन् मार्कण्डेयेश्वर क्षमस्व" इति विसर्ज्जयेत् । ततोऽक्षयवटं गत्वा—

ॐ अद्य पापक्षयकामोऽक्षयवटप्रदक्षिणत्रयपूर्व्वकनमस्कार-महं करिष्ये ॥

इति सङ्कल्प्य तं त्रिः प्रदक्षिणीकृत्य प्रणमेत् । ततः पूर्व्व-वत्सङ्कल्प्याक्षयवटं भक्त्या पूजयेत् ॥

तत्र पूजामन्त्रः—

ॐ नमोऽव्यक्तरूपाय महाप्रलयकारिणे ।
महद्रसोपविष्टाय न्यग्रोधाय नमोऽस्तु ते ॥
अमरस्त्वं सदा कल्पे हरेश्चायतनं वट ।
न्यग्रोध हर मे पापं कल्पवृक्ष नमोऽस्तु ते ॥

ततः ॐ अद्य ब्रह्महत्यादिपापक्षयकामोऽक्षयवटच्छायाक्रमण-महं करिष्ये ।

इति सङ्कल्प्य तस्य छायायां क्षणं तिष्ठेत् ।

ततः—ॐ अद्य राजसूयाश्वमेधयज्ञजन्यफलाधिकफलप्राप्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्ववंशोद्धारपूर्व्वकविष्णुलोकमहितत्वकामो अक्षयवटदर्शनमहं करिष्ये ।

इति सङ्कल्प्य अक्षयवटं पश्येत् । प्रणिपातेऽप्येतदेव फलम् । ततः—

कृष्णपुरतःस्थितस्य वैनतेयस्य समीपं गत्वा—

ॐ अद्य सर्व्वपापविनिर्म्मुक्तात्वात्मीयविष्णुपुरगमनकामो वैनतेयनमस्कारमहं करिष्ये । इति सङ्कल्प्य—तं नमस्कुर्य्यात् । ततो विष्णोरायतनद्वारि प्राङ्मुख उदङ्मुखो वा उपविश्य—

ॐ अद्य परमगतिप्राप्तिकामः पुरुषोत्तमदर्शनमहं करिष्ये, इति सङ्कल्प्य पुरुषोत्तममुखं पश्येत् । तत एवमेव सङ्कर्षणस्य दर्शनं सङ्कल्प्य कुर्य्यात् । एवमेव सुभद्रादर्शनं सङ्कल्प्य कुर्य्यात् ।

ततो विष्णोरायतनं प्रविश्य—विष्णुं त्रिः प्रदक्षिणीकुर्य्यात् । ततः—ॐ अद्य अभिमतफलप्राप्ति-सर्व्वपापविनिर्म्मुक्त्यात्मीयविष्णुलोकगमन--तदधिकरणकाङ्क्षतसंप्लवव्यापिसुखभोग—तदुत्तरैहिकयोगिब्राह्मणप्रवरकुलजात--सर्व्वशास्त्रार्थपारगब्राह्मणप्रवरत्वभवन-तदुत्तरज्ञानप्राप्तिपूर्व्वकमोक्षप्राप्तिकामः सङ्कर्षणपूजनमहं करिष्ये ।

इति सङ्कल्प्य सङ्कर्षणं पूजयेत् ।

तत्र मन्त्रः—

ॐ नमस्ते हलधृग्राम नमस्ते मुषलायुध ।
नमस्ते रेवतीकान्त नमस्ते भक्तवत्सल ॥
नमस्ते बलिनां श्रेष्ठ नमस्ते धरणीधर ।
प्रलम्बारे नमस्तेऽस्तु त्राहि मां कृष्णपूर्व्वज ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः पञ्चोपचारान् कृत्वा इममेव मन्त्रं पठित्वा प्रणिपत्य प्रसादयेत्। ततः—

ॐ अद्य मोक्षप्राप्तिकामो द्वादशाक्षरमन्त्रेण पुरुषोत्तममहं पूजयिष्ये।

इति सङ्कल्प्य "ॐ नमो भगवते वासुदेवाय" इति द्वादशाक्षर-मन्त्रेण गन्ध-पुष्प-धूप-दीप-नैवेद्यैः पुरुषोत्तमं पूजयेत्। ततः—

ॐ जय कृष्ण जगन्नाथ जय सर्व्वाघनाशन।
जय चानूरकेशिघ्न जय कंसनिसूदन॥
जय पद्मपलाशाक्ष जय चक्रगदाधर।
जय नीलाम्बुदश्याम जय सर्व्वसुखप्रद॥
जय देव जगत्पूज्य जय संसारनाशन।
जय लोकपते नाथ जय वाञ्छाफलप्रद॥
संसारसागरे घोरे[1] निःसारे दुःखफेनिले।
क्रोधग्राहाकुले रौद्रे विषयोदकसंप्लवे॥
नानारोगोर्म्मिकलिले[2] मोहावर्त्तसुदुस्तरे।
निमग्नोऽहं सुरश्रेष्ठ त्राहि मां पुरुषोत्तम॥

इति मन्त्रं पठित्वा प्रणिपत्य प्रसादयेत्।

अथ प्रसादनानन्तरं—

पीनांसं द्विभुजं कृष्णं पद्मपत्रायतेक्षणम्।
महोरस्कं महाबाहुं पीतवस्त्रं शुभाननम्॥

---

(१) घ पुस्तके दुःखसन्तापफेनिले।

(२) ग पुस्तके—कलिले।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्ख-चक्र-गदापाणिं मुकुटाङ्गदभूषणम् ।
सर्व्वलक्षणसंयुक्तं वनमालाविभूषितम् ॥

कृष्णं पश्येत् ।

तत्र सङ्कल्पः—

ॐ अद्याश्वमेधसहस्रजन्यफलसमफलप्राप्तिकामः कृष्णदर्शन-महं करिष्ये ।

सर्व्वतीर्थाधिकरणकस्नानदान-
जन्यफलसमफलप्राप्तिकामो वा ।
सर्व्ववेदाध्ययन सर्व्वव्रताचरण-
जन्यफलसमफलप्राप्तिकामो वा ॥
सर्व्वदानव्रतनियमजन्य-
फलसमफलप्राप्तिकामो वा ।
विविधोग्रतपश्चरणजन्यफल-
समफलप्राप्तिकामो वा ॥
सम्यक्चीर्णब्रह्मचर्य्यजन्यफल-
समफलप्राप्तिकामो वा ।
सम्यक् गृहाश्रमपरिपालनजन्य-
फलसमफलप्राप्तिकामो वा ॥

यद्वा—

ॐ अद्य एकविंशतिकुलोद्धरणपूर्व्वकजन्मकोटिसमुद्भवबहुपाप-विनिर्म्मुक्ति--परमश्रीयुतसर्व्वगुणोपेतात्मकर्त्तृक--सर्व्वकामसमृद्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुवर्च्चो विमानकरणकविष्णुपुरगमन-तदधिकरणककल्पशतपर्य्यन्त-गन्धर्व्वाप्सरःसहित-चतुर्भुजात्मीयविष्णुवन्मनोरम-बहुभोगोपभोग-तदुत्तरैहिकविप्रप्रवरकुलाधिकरणकसर्व्वज्ञ--सर्व्ववेदि-गतमत्सर-स्वधर्म्मनिरत-शान्त-दान्त-भूतहितरतात्मीयजन्म-तदुत्तरवैष्णवयोग-प्राप्तिपूर्व्वकमोक्षावाप्तिकामः कृष्णदर्शनमहं करिष्ये।

प्रणामेऽपि पूर्व्वोक्तेष्वन्यतमत् फलमिति।

अथ सुभद्रापूजा।

ॐ अद्य कामगविमानकरणकविष्णुपुरगमन-तदधिकरणका-हूतसंप्लवपर्य्यन्तदेववत्क्रीड़न--तदुत्तरैहिकवेदविद्ब्राह्मणत्वभवन-तदुत्तरहरियोगप्राप्तिपूर्व्वकमोक्षप्राप्तिकामः सुभद्रापूजनमहं करिष्ये।

इति सङ्कल्प्य पञ्चोपचारेण पूजयेत्।

पूजामन्त्रस्तु—

ॐ नमस्ते सर्व्वगे देवि नमस्ते शुभसौख्यदे।
त्राहि मां पद्मपत्राक्षि कात्यायनि नमोऽस्तु ते॥

प्रणिपाते प्रसादने चाऽयं मन्त्रः।

एवं सङ्कर्षणं, कृष्णं, सुभद्राञ्च दृष्ट्वा सम्पूज्य प्रणम्य स्तुत्वा देवालयान्निष्क्रम्य पुनः पुरुषोत्तमं प्रणम्य कृतकृत्यो भवति। ततः—

पुरुषोत्तमात् प्रथमं ब्रह्मस्थापितामिन्द्रनीलमयीं विष्णु-प्रतिमां पुरुषोत्तमदक्षिणे अक्षयवटवायव्ये वालुकाच्छन्नामन्त-र्हितां गत्वा—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र ॐ अद्य विष्णुपुरगमनकाम इन्द्रनीलमयविष्णुप्रणाममहं करिष्ये । इति सङ्कल्प्य प्रणमेत् ।

ॐ अद्य महापातकविमुक्ति-शताश्वमेधजन्यफलसमफल-प्राप्ति एकविंशतिकुलोद्धरणपूर्व्वकसर्व्वगुणालङ्कृतसर्व्वकामसमृद्ध-जरामरणविवर्ज्जित-देववन्मुदित-सुखित्वाप्सरःस्तूयमानात्मकर्त्तृक-सौवर्णकिङ्किणीजालमालि-सर्व्वकामसमृद्ध-कामग-सुवर्चस्तरुणा-दित्यवर्ण--मुक्ताहारालम्बि--दिव्यस्त्रीशतयुक्त--दिव्यगन्धर्व्वनादि-विमान--करणकविष्णुपुरगमन---तदधिकरणकमनःसमाह्लादकर-सौख्य---चतुर्भुजरूपकरणपूर्व्वकाहूतसंप्लवव्यापि--गन्धर्व्वाप्सरोयुत-स्त्रीयबहुवरभोगोपभोगपूर्व्वकैहिकप्रवरयोगिकुलाधिकरणकचतु--र्व्वेदिवेदवेदाङ्गपारगविप्रत्वभवन--वैष्णवयोगहेतुकमोक्षप्राप्तिकामो नरसिंहदर्शनमहं करिष्ये ।

इति सङ्कल्प्य तं पश्येत् । पूजायामेवम् । प्रणामेऽप्येवम् ।

ततोऽनन्ताख्यं वासुदेवं गत्वा—ॐ अद्य सर्व्वपापविनिर्म्मुक्त्या-त्मीयपरमपदप्राप्तिकामो अनन्ताख्यवासुदेवसन्दर्शनमहं करिष्ये । प्रणामेऽप्येवमिति ।

ततः श्वेतगङ्गां गत्वा—ॐ अद्य श्वेतद्वीपगमनकामः श्वेतगङ्गा-स्नानपूर्व्वकश्वेतमाधवदर्शनमहं करिष्ये ॥

इति सङ्कल्प्य श्वेतगङ्गायां वैधस्नान-तर्पणे कृत्वा श्वेतमाधवं पश्येत् । ततः—

ॐ अद्य ब्रह्मलोकमहितत्व-तदधिकरणकबहुब्रह्मपुरुषसहित बहुदेवकन्यावृत-तदुपगीयमानसिद्ध-गन्धर्व्व-सेवितस्त्रीययथेष्टविपुल

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बहुभोगपूर्व्वकैहिकवेदवेदाङ्गवित् श्रीमद्भोगवच्चिरजीविगजाश्वरथ-माल्याव्यधनधान्याहृतशुचिरूप-बहुभाग्यपुत्रपौत्रसमन्वितब्राह्मणत्वभवन-तदुत्तरपुरुषोत्तमप्राप्ति-वटमूलसागराधिकरणकदेहत्याग-हरिस्मरणपूर्व्वकशान्तपदगमनकामो गमनपूर्व्वकश्वेतमाधव-प्रणाममहं करिष्ये ।

इति सङ्कल्प्य तत्रैव पदमेकं तदभिमुखं गत्वा प्रणमेत् । ततः पुनः श्वेतगङ्गां गत्वा—

ॐ अद्य श्वेतद्वीपगमनकामः श्वेतगङ्गास्नानपूर्व्वकमत्स्यमाधव-दर्शनमहं करिष्ये ।

इति सङ्कल्प्य श्वेतगङ्गायां वेधस्नानतर्पणे कृत्वा मत्स्यमाधवं पश्येत् ।

ॐ अद्य नारायणाधिष्ठितपरमस्थानगमन-तदुत्तरपृथिवी-तलाधिकरणक-दातृ-भोक्तृ-यज्ज-वैष्णव-सत्यसन्धराजत्वभवन-तदुत्तर-हरियोगप्राप्तिपूर्व्वक-मोक्षावाप्तिकामो मत्स्यमाधवदर्शन-प्रणामावहं करिष्ये ।

इति सङ्कल्प्य मत्स्यमाधवदर्शन-प्रणामौ कुर्य्यात् ।

इति ज्यैष्ठशुक्लद्वादशीकृत्यम् ।

ब्रह्मपुराणे—

मार्कण्डेयह्रदे स्नानं सर्व्वकालं प्रशस्यते ।
चतुर्द्दश्यां विशेषेण सर्व्वपापप्रणाशनम् ॥
तद्वत् स्नानं समुद्रस्य सर्व्वकालं प्रशस्यते ।
पौर्णमास्यां विशेषेण हयमेधफलं लभेत् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—

पूर्णिमा ज्यैष्ठमासस्य ज्येष्ठा ऋक्षं यदा भवेत् ।
तदा गच्छेद्विशेषेण तीर्थराजं परं शुभम् ॥

विशेषेण इति वचनादन्यत्रापि सागरस्नानमविरुद्धम् ।

कायवाङ्मानसैः शुद्धस्तद्भावो नान्यमानसः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तो वीतरागो विमत्सरः ॥
कल्पवृक्षवटं रम्यं यत्र साक्षाज्जनार्द्दनः ।
प्रदक्षिणं प्रकुर्व्वीत (?) त्रयोवारान् समाहितः ॥
यं दृष्ट्वा मुच्यते पापात् सप्तजन्मसमुद्भवात् ।
पुण्यञ्चाप्नोति विपुलं गतिमिष्टाञ्च भो द्विजाः ॥
तस्य नामानि वक्ष्यामि प्रमाणञ्च युगे युगे ।
यथासङ्ख्यञ्च भो विप्राः कृतादिषु यथाक्रमम् ॥
वटं वटेश्वरञ्चैव पुराणं [1]पुरुषं द्विजाः ।
वटस्यैतानि नामानि कीर्त्तितानि कृतादिषु ॥
योजनं पादहीनञ्च योजनार्द्धं तदर्द्धकम् ।
प्रमाणं कल्पवृक्षस्य कृतादौ परिकीर्त्तितम् ॥
पूर्व्वोक्तेन तु मन्त्रेण नमस्कृत्वा तु तं वटम् ।
दक्षिणाभिमुखो गच्छेद्धन्वन्तरशतत्रयम् ॥
यत्रासौ दृश्यते [2]चिह्नं स्वर्गद्वारं मनोरमम् ।
सागराम्भः[3]समाकृष्टं काष्ठं सर्व्वगुणान्वितम् ॥

---

(१) घ पुस्तके वटेश्वरं कृष्णं पुराणपुरुषम् ।

(२) ग पुस्तके विष्णुः ।

(३) घ पुस्तके—समाकीर्णम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रणिपत्य ततस्तस्थौ परिपूज्य ततः पुनः ।
मुच्यते सर्व्वरोगाद्यैस्तथा पापैर्ग्रहादिभिः ॥
उग्रसेनं पुरा दृष्ट्वा स्वर्गद्वारेण [1]सागरम् ।
गत्वाचम्य शुचिस्तत्र ध्यात्वा नारायणं परम् ॥
न्यसेदष्टाक्षरं मन्त्रं पश्चाद्धस्त-शरीरयोः ।
(ॐ) नमो नारायणायेति संवदन्ति मनीषिणः ॥
किं कार्य्यं बहुभिर्मन्त्रैर्मनोविभ्रमकारकैः ।
(ॐ) नमो नारायणायेति मन्त्रः सर्व्वार्थसाधकः ॥
आपो नरस्य सूनुत्वात् नारा इति ह कीर्त्तिताः ।
[2]विष्णोस्तास्त्वयनं पूर्व्वं तेन नारायणः स्मृतः ॥
नारायणपरा देवा नारायणपरा द्विजाः ।
नारायणपरा ज्ञानाः नारायणपराः क्रियाः ॥
नारायणपरो धर्म्मो नारायणपरं तपः ।
नारायणपरं दानं नारायणपरं व्रतम् ॥
नारायणपरा लोका नारायणपराक्षराः ।
नारायणपरं नित्यं नारायणपरं पदम् ॥
नारायणपरा पृथ्वी नारायणपरं जलम् ।
नारायणपरो बह्निः नारायणपरं नभः ।
अहङ्कारश्च बुद्धिश्च उभे नारायणात्मके ॥
भूतं भव्यं भविष्यच्च यत्किञ्चिज्जीवसंज्ञितम् ।

---

(१) ग पुस्तके सङ्गतम् ।

(२) घ पुस्तके तास्त्वयनम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थूलं सूक्ष्मं परञ्चैव सर्व्वं नारायणात्मकम् ।
शब्दाद्याः विषयाः सर्व्वे श्रोत्रादीनीन्द्रियाणि च ॥
प्रकृतिः पुरुषश्चैव सर्व्वे नारायणात्मकाः ।
जले स्थले च पाताले दिक्षु नागेऽम्बरे नगे ॥
अवष्टभ्य इदं सर्व्वमास्ते[1] नारायणः प्रभुः ।
किञ्चात्र बहुनोक्तेन जगदेतच्चराचरम् ॥
ब्रह्मादिस्तम्बपर्य्यन्तं सर्व्वं नारायणात्मकम् ।
नारायणात् परं किञ्चित् नेह पश्यामि भो द्विजाः ॥
तेन व्याप्तमिदं सर्व्वं [2]दृश्यमानं चराचरम् ।
आपो ह्यायतनं विष्णोः स च एवाम्भसां पतिः ॥
तस्मादप्सु स्मरेन्नित्यं नारायणमघापहम् ।
स्नानकाले विशेषेण चोपस्थाय परं शुचिः ॥
स्मरेन्नारायणं ध्यायेत् हस्ते काये च विन्यसेत् ।
ॐकारञ्च नकारञ्च यत्किञ्चिज्जीवसंज्ञकम् ॥
अङ्गुष्ठे हस्ते पादे च शिखायां शिरसि न्यसेत् ।
शेषैर्हस्ततलै[3]र्यावत् तर्ज्जन्यादिषु विन्यसेत् ॥
ॐकारं वामपादे तु नकारं दक्षिणे न्यसेत् ।
मोकारं वामकट्यान्तु नाकारं दक्षिणे तथा ॥

---

(१) ख पुस्तके अन्ते ।
(२) ग पुस्तके दृश्याद्दृश्यम् ।
(३) ख पुस्तके शेषं हस्ततलम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शाकारं नाभिदेशे तु यकारं वामबाहुके ।
णाकारं दक्षिणे न्यस्य यकारं मूर्द्ध्नि विन्यसेत् ॥
अधश्चोर्द्धञ्च हृदये पार्श्वतः पृष्ठतोऽग्रतः ।
ध्यात्वा नारायणं पश्चादारभेत् कवचं बुधः ॥
पूर्व्वे मां पातु गोविन्दो दक्षिणे मधुसूदनः ।
पश्चिमे श्रीधरो देवः केशवस्तु तथोत्तरे ॥
पातु विष्णुस्तथाग्नेये नैर्ऋते माधवोऽव्ययः ।
वायव्ये तु हृषीकेशस्तथैशाने च माधवः ॥
भूतले पातु वाराहस्तथोर्द्धञ्च त्रिविक्रमः ।
कृत्वैवं कवचं पश्चात् आत्मानं चिन्तयेत् बुधः ॥
अहं नारायणो देवः शङ्ख-चक्र-गदाधरः ।
एवं ध्यात्वा तदात्मानमिमं मन्त्रमुदीरयेत् ॥
त्वमग्निर्द्विपदां[1] नाथ रेतोधाः कामदीपनः ।
प्रधानः सर्व्वभूतानां जीवानां प्रभुरव्ययः ॥
अमृतस्यारणिस्त्वं हि देवयोनिरपांपते ।
वृजिनं हर मे [2]सर्व्वं तीर्थराज नमोऽस्तु ते ॥
एवमुच्चार्य्य विधिवत् ततः स्नानं समाचरेत् ।
अन्यथा भो द्विजश्रेष्ठाः स्नानं तत्र न शस्यते ॥
कृत्वा [3]चाब्दैवतैर्मन्त्रैरभिषेकञ्च मार्ज्जनम् ।
अन्तर्जले जपेत् पश्चात् त्रिरावृत्त्याऽघमर्षणम् ॥

---

(१) ख पुस्तके द्विषताम् ।
(२) घ पुस्तके देव ।
(३) मूलपुस्तके—तु वैदिकैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हयमेधो यथा विप्राः सर्व्वपापहरः क्रतुः।
तथाघमर्षणञ्चात्र सूक्तं सर्व्वाघनाशनम्॥
उत्तीर्य्य वाससी धौते निर्णिक्ते परिधाय वै।
प्राणानायम्य चाचम्य सन्ध्याञ्चोपास्य भास्करम्॥
उपतिष्ठेत्ततश्चोर्द्ध्वं चिप्त्वा पुष्पजलाञ्जलिम्।
उपस्थायोर्द्ध्वबाहुश्च तल्लिङ्गैर्भास्करं ततः॥
गायत्रीं पावनीं देवीं जपेदष्टोत्तरं शतम्।
अन्यांश्च सौरमन्त्रांश्च जप्त्वा तिष्ठन् समाहितः॥
कृत्वा प्रदचिणं सूर्य्यं नमस्कृत्योपविश्य च।
स्वाध्यायं प्राङ्मुखः कृत्वा तर्पयेद्दैवतानृषीन्॥
मनुष्यांश्च पितॄंश्चान्यान्नामगोत्रेण मन्त्रवित्।
तोयेन तिलमिश्रेण तर्पयेत् सुसमाहितः॥
तर्पणं देवतानान्तु पूर्व्वं कृत्वा समाहितः।
अधिकारी भवेत् पश्चात् पितॄणां तर्पणे द्विजाः॥
श्राद्धे हवनकाले च पाणिनैकेन [1]निर्व्वपेत्।
तर्पणे [2]त्रितयं कुर्य्यादेष एव विधिः सदा॥
अन्वारब्धेन सव्येन पाणिना दचिणेन तु।
तृप्यतामिति वक्तव्यं नामगोत्रेण वाग्यतैः॥
कायस्थैर्यैस्तिलैर्मोहात् करोति पितृतर्पणम्।
तर्पितास्तेन पितरस्त्वङ्मांसरुधिरास्थिभिः॥

---

(१) ग पुस्तके तर्पयेत्।
(२) मूलपुस्तके—द्वितीयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अङ्गस्थेन तिलैः कुर्य्याद्देवता-पितृतर्पणम्।
रुधिरं तद्भवेत्तोयं प्रदाता किल्बिषी भवेत्॥
भूम्यां यद्दीयते तोयं दाता चैव जले स्थितः।
वृथा तन्मुनिशार्दूला नोपतिष्ठति कस्यचित्॥
स्थले स्थित्वा जले यस्तु प्रयच्छेदुदकं नरः।
नोपतिष्ठेत् पितृणान्तु सलिलं तन्निरर्थकम्॥
उदके नोदकं कुर्य्यात् पितृभ्यश्च कदाचन।
उत्तीर्य्य तु शुचौ देशे कुर्य्यादुदकतर्पणम्॥
नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना।
नोपतिष्ठति तत्तोयं यद्भूम्यां न प्रदीयते॥
पितृणामक्षयं स्थानं[1] मही दत्ता मया द्विजाः।
तस्मात्तत्रैव दातव्यं पितृणां प्रीतिमिच्छता॥
भूमिपृष्ठे समुत्पन्ना भूम्यां चैव तु संस्थिताः।
भूम्यां चैव लयं याता भूमौ दद्यात्ततो जलम्॥
आस्तीर्य्य च कुशान् साग्रान् तानावाह्य च मन्त्रतः।
प्राचीनाग्रेषु वै देवान् याम्याग्रेषु तथा पितॄन्॥
देवान् पितॄन् तथा चान्यान् सन्तर्प्याचम्य वाग्यतः।
हस्तमात्रं चतुष्कोणं चतुर्द्वारं सुशोभनम्॥
पुरं प्रलिख्य[2] भो विप्रास्तीरे तस्य महोदधेः।
मध्ये तत्र लिखेत् पद्ममष्टपत्रं सकर्णिकम्॥

(१) घ पुस्तके—सम्यक्।
(२) ग पुस्तके—प्रलिप्य।

5082

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं मण्डलमालिख्य पूजयेत्तत्र भो द्विजाः ।
अष्टाक्षरविधानेन नारायणमजं विभुम् ॥
अतः परं प्रवक्ष्यामि कायशोधनमुत्तमम् ।
आकारं हृदये चिन्त्यं[1] रक्तं रेफसमन्वितम् ॥
ज्वलन्तं त्रिशिखञ्चैव दहनं पापनाशनम् ।
चन्द्रमण्डलमध्यस्थम् आ(रा)कारं मूर्द्ध्नि विन्यसेत् ॥
शुक्लवर्णं प्रवर्षन्तममृतं प्लावयन्महीम् ।
एवं निर्धूतपापस्तु दिव्यदेहस्ततो भवेत् ॥
अष्टाक्षरं ततो मन्त्रं न्यसेदेवात्मनो बुधः ।
वामपादं समारभ्य क्रमशश्चैव विन्यसेत् ॥
पञ्चाङ्गं वैष्णवञ्चैव चतुर्व्यूहं तथैव च ।
करशुद्धिं प्रकुर्व्वीत मूलमन्त्रेण साधकः ॥
एकैकञ्चैव वर्णन्तु अङ्गुलीषु पृथक् पृथक् ।
ॐकारं भूर्लोकं शुक्लं[2] वामपादे तु विन्यसेत् ॥
नकारस्तु भुवो रक्तो[3] दक्षिणे तु व्यवस्थितः ।
मोकारो वामकट्यान्तु श्यामः सर्व्वैर्व्यवस्थितः ॥
नाकारः सर्व्वबीजन्तु दक्षिणस्यां व्यवस्थितः[4] ।
राकारः कुङ्कुमाभो जनलोको नाभिमाश्रितः ॥

---

(१) घ पुस्तके—चक्ररेखा- ।
(२) घ पुस्तके—पृथिवीं शुक्लां ।
(३) ख पुस्तके—शाम्भवः श्यामः ।
(४) मूलपुस्तके—नाकारो रक्तवर्णो महर्लोको दक्षकट्याश्रितः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यकारः पीतवर्णश्च वामस्कन्धे समाश्रितः ।
णाकारः कज्जलाभः स्यात् दक्षिणांशे व्यवस्थितः ।
यकारोऽयं शिरस्थश्च यत्र लोकाः प्रतिष्ठिताः ॥

ॐ विष्णवे नमः-शिरः । ॐ ज्वलनाय नमः-शिखा । ॐ विष्णवे नमः-कवचम् । ॐ विष्णवे नमः स्फुरस्फुरदिशो बन्धनम् । ॐ हुं फड़स्त्रम् । ॐ शिरसि शुक्लो वासुदेव इति ।

ॐ आं ललाटे रक्तः सङ्कर्षणो गरुत्वान् वह्निस्तेज आदित्य इति ।

ॐ आं ग्रीवायां पीतः प्रद्युम्नो वायुमेघ इति । ॐ आं (श्रीं) हृदये [1]कृष्णोऽनिरुद्धः सर्व्वशक्तिसमन्वित इति ।

एवं चतुर्व्यूहमात्मानं कृत्वा ततः कर्म्म समाचरेत् ।

ममाग्रे च स्थितो विष्णुः पृष्ठतश्चापि केशवः ।
गोविन्दो दक्षिणे पार्श्वे वामे तु मधुसूदनः ॥
उपरिष्टात्तु वैकुण्ठो वाराहः पृथिवीतले ।
अवान्तरदिशो यासु तासु सर्व्वासु माधवः ॥
गच्छतस्तिष्ठतो वाऽपि जाग्रतः स्वपतोऽपि वा ।
नरसिंहकृता गुप्तिर्वासुदेवमयोह्यहम् ॥
एवं विष्णुमयो भूत्वा ततः कर्म्म समारभेत् ।
यथात्मनि तथा देवे[2] सर्व्वतत्त्वानि योजयेत् ॥

---

(१) ग पुस्तके—हृष्टः ।
(२) क ख पुस्तकद्वये—यथा देहे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततश्चैव प्रकुर्व्वीत प्रोक्षणं प्रणवेन तु ।
फट्कारान्तं समुद्दिष्टं सर्व्वविघ्नहरं शुभम् ॥
तत्रार्क-चन्द्र-वह्नीनां मण्डलानि विचिन्तयेत् ।
पद्ममध्ये[1] न्यसेद्विष्णुं पवनस्याम्बरस्य च ॥
ततो विचिन्त्य हृदये ॐकारं ज्योतीरूपिणम् ।
कर्णिकायां समासीनं ज्योतीरूपं सनातनम् ।
अष्टाक्षरं ततो मन्त्रं विन्यसेच्च यथाक्रमम् ॥
तेन व्यस्तसमस्तेन पूजनं परमं स्मृतम् ।
द्वादशाक्षरमन्त्रेण यजेद्देवं सनातनम् ॥
ततोऽवधार्य्य हृदये कर्णिकाया बहिर्न्यसेत्[2] ।
चतुर्भुजं महासत्वं सूर्य्यकोटिसमप्रभम् ॥
चिन्तयित्वा महायोगं ज्योतीरूपं सनातनम् ।
ततश्चावाहयेन्मन्त्री क्रमेणाचिन्त्यमानसे[3] ॥

आवाहनमन्त्रः—

मीनरूपो वराहश्च नरसिंहोऽथ वामनः ।
आयातु देवो वरदो मम नारायणोऽग्रतः ॥

ॐ नमो नारायणाय नमः ।

स्थापनमन्त्रः—

---

(१) ख पुस्तके—मध्ये मध्ये ।
(२) मूलपुस्तके—हरिं न्यसेत् ।
(३) क पुस्तके—क्रमयोऽचिन्त्यमास्थितः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्णिकायाम्।

ॐ सुमेरोः पादपीठेऽत्र पद्मकल्पितमासनम्।
सर्व्वसत्त्वहितार्थाय तिष्ठ त्वं मधुसूदन॥

ॐ नमो नारायणाय नमः।

अर्घ्यमन्त्रः—

ॐ त्रैलोक्यपतीनां पतये देवदेवाय हृषीकेशाय विष्णवे नमः।

ॐ नमो नारायणाय नमः॥

पाद्यमन्त्रः—

ॐ पाद्यन्तु पादयोर्देव पद्मनाभ सनातन।
विष्णो कमलपत्राक्ष गृहाण मधुसूदन॥

ॐ नमो नारायणाय नमः॥

मधुपर्कमन्त्रः—

मधुपर्कं महादेव ब्रह्माद्यैः कल्पितं तव।
मया निवेदितं भक्त्या गृहाण पुरुषोत्तम॥

ॐ नमो नारायणाय नमः॥

तत्रैव ब्रह्मपुराणे—

आचमनीयमन्त्रः—

मन्दाकिन्याः सितं [1]वारि सर्व्वपापहरं शिवम्।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम्॥

ॐ नमो नारायणाय नमः।

---

(१) ख पुस्तके—मन्दाकिन्यास्तु ते वारि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्नानमन्त्रः—

त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च ।
लोकसन्धृतिमात्रेण[१] वारिणा स्नापयाम्यहम् ॥
ॐ नमो नारायणाय नमः ।

वस्त्रमन्त्रः—

ॐ—देव त्वं वाससा[२] युक्तो यज्ञवर्णसमन्वितः ।
स्वर्णवर्णप्रभं[३] देव वासः स्वीकुरु केशव ॥
ॐ नमो नारायणाय नमः ।

विलेपनमन्त्रः—

ॐ—शरीरन्ते न जानामि चेष्टाञ्चैव च केशव ।
मया निवेदितान् गन्धान् प्रतिगृह्य विलिप्यताम् ॥
ॐ नमो नारायणाय नमः ।

उपवीतमन्त्रः—

ॐ—ऋग्यजुःसाममन्त्रेण त्रिवृतं[४] पद्मयोनिना ।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवाच्युत[५] ॥
ॐ नमो नारायणाय नमः ॥

---

(१) घ पुस्तके—लोकेशवृत्तिमात्रेण ।
(२) घ पुस्तके देवतत्त्वसमायुक्तः ।
(३) ख पुस्तके—प्रभे-वाससी तव ।
(४) क ख पुस्तकयोः निवृत्तम् ।
(५) ग पुस्तके तवार्पये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अलङ्कारमन्त्रः—

ॐ—दिव्यरत्नसमायुक्ता बह्निभानुसमप्रभाः[१] ।
गात्राणि शोभयन्त्वेते अलङ्काराश्च माधव ॥
ॐ नमो नारायणाय नमः ॥

ॐ ॐ-नमः । ॐ न-नमः । ॐ मो-नमः । ॐ ना-नमः । ॐ रा-नमः । ॐ य-नमः । ॐ णा-नमः । ॐ य-नमः । ॐ नमो नारायणाय नमः ।

एवं व्यस्तसमस्तेन मूलमन्त्रेण पूजयेत् ।

धूपमन्त्रः—

वनस्पतिरसो दिव्यो गन्धाढ्यः सुरभिश्च ते[२] ।
मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥
ॐ नमो नारायणाय नमः ।

दीपमन्त्रः—

ॐ सूर्य्याचन्द्रमसोर्ज्योतिर्विद्युदग्न्योस्तथैव च ।
त्वमेव ज्योतिषां देव दीपोऽयं प्रतिगृह्यताम् ॥
ॐ नमो नारायणाय नमः ।

नैवेद्यमन्त्रः—

ॐ—अन्नञ्चतुर्व्विधञ्चैव रसैः षड्भिः समन्वितम् ।
मया निवेदितं भक्त्या नैवेद्यं तव केशव ॥
ॐ नमो नारायणाय नमः ।

---

(१) क ख पुस्तकद्वये—समन्विताः ।

(२) ग पुस्तके सुमनोहरः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाच तत्रैव ब्रह्मपुराणे—

पूर्व्वे दले वासुदेवं याम्ये सङ्कर्षणं न्यसेत् ।
प्रद्युम्नं पश्चिमे कुर्य्यादनिरुद्धं तथोत्तरे ॥
वाराहञ्च तथाग्नेये नरसिंहञ्च नैर्ऋते ।
वायव्ये माधवञ्चैव तथेशाने त्रिविक्रमम् ॥
तथाष्टाक्षरमन्त्रस्य[1] पुरतो गरुड़ं न्यसेत् ।
तथा महागदाञ्चैव न्यसेद्देवस्य दक्षिणे ॥
ततः शार्ङ्गधनुर्विद्वान् न्यसेद्देवस्य वामतः ।
दक्षिणेनेषुधी दिव्ये शङ्खं वामे च विन्यसेत् ॥
श्रियं दक्षिणतः स्थाप्य पुष्टिमुत्तरतो न्यसेत् ।
वनमालाञ्च पुरतस्ततः श्रीवत्स-कौस्तुभौ ॥
विन्यसेत् हृदयादीनि पूर्व्वादिषु चतुर्द्दिशम् ।
ततोऽस्त्रं देवदेवस्य कोणे चैव तु विन्यसेत् ॥
इन्द्रमग्निं यमञ्चैव नैर्ऋतं वरुणन्तथा ।
वायुं धनदमीशानमनन्तं ब्रह्मणा सह ॥
पूजयेत्तान् [2]स्वकैर्मन्त्रैरधश्चोर्द्धं तथैव च ।
एवं सम्पूज्य देवेशं मण्डलस्थं जनार्द्दनम् ॥
लभेदभिमतान् कामान् नरो नास्त्यत्र संशयः ।
अनेनैव विधानेन मण्डलस्थं जनार्द्दनम् ॥

---

(१) घ पुस्तके—देवस्य ।
(२) मूलपुस्तके—तान्त्रिकैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूजितं यस्तु पश्येत स विशेत् विष्णुमव्ययम् ।
सकृदप्यर्च्चितो येन विधिनानेन केशवः ॥
जन्ममृत्युजरास्तीर्त्त्वा[1] स विष्णोः पदमाप्नुयात् ।
यः स्मरेत् सततं भक्त्या नारायणमतन्द्रितः ॥
अन्वहं तस्य वासाय श्वेतद्वीपः प्रकल्पितः ।
ॐकारादिसमायुक्तं नमस्कारान्तदीपितम् ॥
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ।
अनेनैव विधानेन गन्धपुष्पे निवेदयेत् ॥
एकैकस्य प्रकुर्व्वीत यथोद्दिष्टं क्रमेण तु ।
मुद्रास्ततो निबध्नीयात् यथोक्तक्रमचोदिताः ॥
जपञ्चैव प्रकुर्व्वीत मूलमन्त्रेण मन्त्रवित् ।
अष्टाविंशतिमष्टौ वा शतमष्टोत्तरं तथा ॥
कालेषु च तथाप्येवं[2] यथाशक्ति समाहितः ॥
पद्मं शङ्खश्च श्रीवत्सो गदा गरुड़ एव च ।
खड्गश्चक्रञ्च शार्ङ्गञ्च अष्टौ मुद्राः प्रकीर्त्तिताः ॥

विसर्ज्जनमन्त्रः—

गच्छ गच्छ परं स्थानं पुराणपुरुषोत्तम ।
यत्र ब्रह्मादयो देवा विन्दन्ति परमं पदम् ।
अर्च्चनं ये न जानन्ति हरेर्मन्त्रैर्यथोदितम् ।
ते तत्र मूलमन्त्रेण पूजयन्त्वच्युतं सदा ।

---

(१) क ख पुस्तकद्वये—जरास्तीर्णाः । ग पुस्तके—जरातीतम् ।
(२) ख पुस्तके— यथाप्रोक्तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मोवाच—

एवं सम्पूज्य विधिवत् भक्त्या तं पुरुषोत्तमम् ।
प्रणम्य शिरसा पश्चात् सागरञ्च प्रसादयेत् ॥
प्राणस्त्वं सर्व्वभूतानां योनिश्च सरितां पते ! ।
तीर्थराज नमस्तेऽस्तु त्राहि मामच्युतप्रिय ॥
स्नात्वैवं सागरे सम्यक् तस्मिन् क्षेत्रवरे द्विजाः ।
तीरे[1] चाभ्यर्च्चेय विधिवत् नारायणमनामयम् ॥
रामं कृष्णं सुभद्राञ्च प्रणिपत्य च सागरम् ।
शतानामश्वमेधानां फलं प्राप्नोति मानवः ।
सर्व्वपापविनिर्म्मुक्तः सर्व्वदुःखविवर्ज्जितः ।
वृन्दारक इव श्रीमान् रूपयौवनगर्व्वितः ॥
विमानेनार्कवर्णेन दिव्यगन्धर्व्वनादिना ।
कुलैकविंशमुद्धृत्य विष्णुलोकञ्च गच्छति ॥
भुक्त्वा तत्र वरान् भोगान् क्रीड़ित्वा चाप्सरैः सह ।
मन्वन्तरशतं साग्रं जरा[2]मृत्युविवर्ज्जितः ॥
पुण्यक्षयादिहायातः कुले [3]सर्व्वगुणान्विते ।
रूपवान् सुभगः श्रीमान् सत्यवादी जितेन्द्रियः ॥
वेदशास्त्रार्थविद्विप्रो भवेद्यज्वा तु वैष्णवः ।
योगञ्च वैष्णवं प्राप्य ततो मोक्षमवाप्नुयात् ॥

---

(१) घ पुस्तके—तीर्थे ।
(२) ख पुस्तके—नरो मृत्यु- ।
(३) ख पुस्तके—बहु- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रहोपरागे संक्रान्त्यामयने विषुवे तथा ।
युगादिषु षड़शीत्यां व्यतीपाते दिनक्षये ॥
आषाढ़्याञ्चैव कार्त्तिक्यां माघ्याञ्चान्यशुभे तिथौ ।
ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति सुमेधसः ॥
फलं सहस्रगुणितमन्यतीर्थाल्लभन्ति ते ।
पितृणां ये प्रयच्छन्ति पिण्डं तत्र विधानतः ॥
अक्षयां पितरस्तेषां तृप्तिं संप्राप्नुवन्ति वै ।
एवं स्नानफलं सम्यक् सागरस्य मयोदितम् ॥
दानस्य च फलं विप्राः पिण्डदानस्य चैव हि ।
धर्म्मार्थ-काम(१)फलदमायुःकीर्त्तियशस्करम् ॥
भुक्तिमुक्तिप्रदं नृणां धन्यं दुःस्वप्ननाशनम् ।
सर्व्वपापहरं पुण्यं सर्व्वकामफलप्रदम् ॥
भूतले यानि तीर्थानि सरितश्च सरांसि च ।
विशन्ति सर्व्वतीर्थानि तेनासौ श्रेष्ठतां गतः ॥
नास्तिकाय न वक्तव्यं नरायेदं द्विजोत्तमाः ।
तावद् भ्रमन्ति तीर्थानि माहात्म्यैः स्वैः पृथक् पृथक् ॥
यावन्न तीर्थराजस्य माहात्म्यं वर्ण्यते द्विजाः ।
राजा समस्ततीर्थानां सागरः सरितां पतिः ॥
तस्मात् समस्ततीर्थेभ्यः श्रेष्ठोऽसौ सर्व्वकामदः ।
तमो नाशं यथाऽभ्येति भास्करेऽभ्युदिते द्विजाः ॥

---

(१) ग पुस्तके—मोक्ष- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्नानेन तीर्थराजस्य तथा सर्व्वाघसंक्षयः ।
कोव्यो नव नवत्यस्तु यत्र तीर्थानि सन्ति वै ॥
कः शक्नोति गुणान् वक्तुं तीर्थराजस्य भो द्विजाः ॥
तस्मात् स्नानञ्च दानञ्च होमं जप्यं सुरार्च्चनम् ।
यत्किञ्चित् क्रियते चात्र चाक्षयं भवति द्विजाः ॥

तत्रैव ब्रह्मोवाच—

ततो गच्छेद्द्विजश्रेष्ठास्तीर्थं यज्ञाङ्गसम्भवम् ॥
इन्द्रद्युम्नसरो नाम यत्रास्ते पावनं शुभम्[1] ॥
गत्वा तत्र शुचिः श्रीमानाचम्य मनसा हरिम् ।
ध्यात्वोपस्थाय च [2]जलमिमं मन्त्रमुदीरयेत् ॥
अश्वमेधाङ्गसम्भूततीर्थ सर्व्वाघनाशन ।
स्नानं त्वयि करोम्यद्य पापं हर नमोऽस्तु ते ॥
एवमुच्चार्य्य विधिवत् स्नात्वा देवान् ऋषीन् पितॄन् ।
तिलोदकेन भो विप्राः सन्तर्प्याचम्य वाग्यतः ॥
दत्त्वा पितॄणां पिण्डांश्च सम्पूज्य पुरुषोत्तमम् ।
दशाश्वमेधिकं सम्यक् फलं प्राप्नोति मानवः ॥
सप्तावरान् सप्त पूर्व्वान् वंशानुद्धृत्य देववत् ।
कामगेन विमानेन विष्णुलोकञ्च गच्छति ॥
भुक्त्वा तत्र परान् भोगान् यावदाचन्द्रतारकम् ।
च्युतस्तस्मादिहायातो मोक्षञ्च लभते ध्रुवम् ॥

---

(१) घ पुस्तके—रविमिमं जलम् ।
(२) क पुस्तके—शम्भूमन्त्रम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ प्रयोगः ।

तत्र—

ज्येष्ठानक्षत्रयुक्तायां तद्धीनायां वा ज्येष्ठपूर्णिमायां तिथ्यन्तरे वा ॐ अद्य शताश्वमेधजन्यफलसमफलप्राप्त्येकविंशतिकुलोद्धरण-सर्व्वपाप-विनिर्मुक्ति-सर्व्वदुःख-विवर्ज्जित-वृन्दारकवत्-श्रीमद्रूप-यौवन-गर्व्वितस्वकर्तृकार्कवर्ण-दिव्यगन्धर्व्व-नादि-विमान-करणक-विष्णुलोकगमन-तदधिकरणक-जरामृत्युविवर्ज्जित-स्वीयसायमन्व-न्तरशतावच्छिन्नबहुवरभोगोपभोगबह्वप्सरःक्रीड़न-तदुत्तरैहिकसर्व्व-गुणान्वित-कुलोत्पन्न-रूपवत्सुभग-श्रीमत्सत्यवादि-जितेन्द्रिय-वेद-शास्त्रार्थविद्यज्व-वैष्णवविप्रत्वभवनवैष्णवयोगप्राप्तिपूर्व्वक-मोक्षा-वाप्तिकामो ब्रह्मपुराणोक्तविधिना सागरस्नानपूर्व्वकनारायणपूजन-मह्हं करिष्ये ।

इति सङ्कल्पशाक्षयवटं त्रिःप्रदक्षिणीकृत्य ततो दक्षिणे धनुः—शतत्रये सागरतीरे शुचौ शुचिरुपविश्य "ॐ नमः" इति त्रिवर्णं हस्ताङ्गुष्ठयोः, ततः पादयोः, ततः शिखायां, ततः शिरसि न्यस्य-ततो नाकारं तर्ज्जन्योः, राकारं मध्यमयोः, यकारमनामिकयोः, णाकारं कनिष्ठयोः, यकारं तलयोर्न्यसेत् ।

ततः ॐकारं वामपादे, नकारं दक्षिणपादे, मोकारं वाम-कट्यां, नाकारं दक्षिणकट्यां, राकारं नाभौ, यकारं वामबाहौ, णाकारं दक्षिणबाहौ, यकारं मूर्द्ध्नि न्यसेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततोऽध ऊर्द्धं, हृदि, पार्श्वयोः, पृष्ठतः, पुरतश्च नारायणं ध्यात्वा—

ॐ—पूर्व्वे मां पातु गोविन्दो दक्षिणे मधुसूदनः ।
पश्चिमे श्रीधरो देवः केशवस्तु तथोत्तरे ॥
पातु विष्णुस्तथाग्नेये नैर्ऋते माधवोऽव्ययः ।
वायव्ये तु हृषीकेशस्तथैशाने च वामनः ।
भूतले पातु वाराहस्तथोर्द्धञ्च त्रिविक्रमः ॥

इति कवचकरणरूपमन्त्रं पठित्वा—

अहं नारायणो देवः शङ्खचक्रगदाधरः ।

इति ध्यात्वा सागरमुद्दिश्य—

ॐ—त्वमग्निर्द्विपदां नाथ रेतोधाः कामदीपनः ।
प्रधानः सर्व्वभूतानां जीवानां प्रभुरव्ययः ॥
अमृतस्यारणिस्त्वं हि देवयोनिरपांपते ।
वृजिनं हर मे सर्व्वं तीर्थराज नमोऽस्तु ते ॥

ततः सागरं प्रविश्य यथोक्तस्नानविधिं निवर्त्त्य ॐ आपो हि ष्ठा मयोभुव इति, ॐ यो वः शिवतमो रस इति, तस्मा अरङ्गमाम इत्याद्यब्दैवतेन मन्त्रत्रयेणाभिषेकं मार्ज्जनञ्च कृत्वा जले मग्नस्त्रिरघमर्षणसूक्तं जपेत् ।

तत उत्तीर्य्य धौते वाससी परिधाय सन्ध्यावन्दनमष्टोत्तरशतगायत्रीजपान्तं कृत्वा—विभ्राड़ित्यादिकमन्यं वा सौरमन्त्रत्रयं जपित्वा सूर्य्यं प्रदक्षिणीकृत्य दर्भत्रयवत्यासने प्राङ्मुख उपविश्य ब्रह्मयज्ञं कृत्वा भूमौ प्रागग्रकुशोपरि देवादितर्पणं सयवजलेन ततो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणाग्रकुशत्रयोपरि पित्रादितर्पणं सतिलजलाञ्जलिभिः कृत्वा कातीयस्नानकरणपक्षे तर्पणोत्तरकर्म्माणि कृत्वा, सूर्य्यायाञ्जलिं दत्त्वा सूर्य्यं सम्पूज्याचम्य मौनी हस्तमितां चतुरस्त्रां चतुर्द्वारां वेदिं विलिख्य तन्मध्येऽष्टदलं सकर्णिकं पद्ममालिख्य हृदये रक्तमाकारं त्रिशिखं ज्वलदग्निरूपं चिन्तयेत्। ततश्चन्द्रमण्डलमध्यस्थमाकारं शुक्लवर्णममृतेन च प्लावयन्तं मूर्द्ध्नि चिन्तयेत्। एतेन च निर्धूतपापो दिव्यदेहो भवति।

ततो नमो नारायणायेति मन्त्रेण कफोणितो अङ्गुल्यग्रपर्य्यन्तयोः करयोः शुद्धिं विधाय नम इति त्रिवर्णीं हस्ताङ्गुष्ठयोः, ततो हस्तयोः, ततः पादयोः, ततः शिखायां, ततः शिरसि न्यस्य—नाकारमङ्गुष्ठयोः, राकारं तर्ज्जन्योः, यकारं मध्यमयोः, णाकारमनामिकयोः, यकारं कनिष्ठयोर्न्यसेत्।

ततः ॐकारं शुक्लवर्णं भूर्लोकात्मकं वामपादे, नकारं रक्तवर्णं भुवर्लोकात्मकं दक्षिणपादे, मोकारं श्यामवर्णं स्वर्लोकात्मकं वामकट्यां, नाकारं रक्तवर्णं महर्लोकात्मकं दक्षिणकट्यां, राकारं कुङ्कुमवर्णं जनलोकात्मकं नाभौ, यकारं पीतवर्णं तपोलोकात्मकं वामबाहुमूले, नाकारं कज्जलाभं सत्यलोकात्मकं दक्षिणबाहुमूले, यकारं रक्तवर्णं ब्रह्मस्वरूपं मूर्द्ध्नि न्यसेत्।

ततः ॐ विष्णवे नम इति शिरः। ॐ ज्वलनाय नम इति शिखा। ॐ विष्णवे नम इति कवचम्। ॐ विष्णो स्फुर इति दिग्बन्धनम्। ॐ हुं फड़स्त्रमिति,ॐ शिरसि शुक्लं वासुदेवमिति न्यसेत्। ललाटे रक्तं सङ्कर्षणं गरुत्मन्तं वह्निं तेज आदित्यं आमिति न्यसेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रीवायां पीतं प्रद्युम्नं वा(रि)युमिघं आमिति न्यसेत्। हृदये कृष्णमनिरुद्धं सर्व्वशक्तिसमन्वितम् आमिति न्यसेत्। ततः—

ममाग्रे च स्थितो विष्णुः पृष्ठतश्चापि केशवः।
गोविन्दो दक्षिणे पार्श्वे वामे तु मधुसूदनः॥
उपरिष्टात्तु वैकुण्ठो वाराहः पृथिवीतले।
अवान्तरा दिशो यास्तु तासु सर्व्वासु माधवः॥
गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा।
नरसिंहकृता गुप्तिर्वासुदेवमयो ह्यहम्॥

इति विचिन्त्य ॐकारं शुक्लवर्णमित्यारभ्य वासुदेवमयो ह्यहमित्यन्तं स्वाभिमुखस्थिते देवेऽपि चिन्तयेत्।

ततः हुं फड़ित्यनेन विघ्नविनाशनाय स्वस्य देवस्य च प्रोक्षणं कुर्य्यात्। ततः कर्णिकोपरि सूर्य्यविम्बं तदुपरि चन्द्रविम्बं तदुपरि-वह्निविम्बं विचिन्त्य व्योममध्ये वायुं वायुमध्येऽष्टदलपद्मं तन्मध्ये विष्णुं न्यसेत्।

ततो हृदि ज्योतीरूपं ॐकारं विचिन्त्य स्थिरीकृत्य कर्णिकायां

चतुर्भुजं महासत्वं सूर्य्यकोटिसमप्रभम्।
चिन्तयित्वा महायोगं ज्योतीरूपं सनातनम्॥

इति विचिन्त्य परमेश्वरम्—

ॐ—मीनरूपो वराहश्च नरसिंहोऽथ वामनः।
आयातु देवो वरदो मम नारायणोऽग्रतः॥

इति मन्त्रेणावाहयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः कर्णिकायाम्—

ॐ सुमेरोः पादपीठेऽत्र पद्मकल्पितमासनम् ।
सर्व्वसत्वहितार्थाय तिष्ठ त्वं मधुसूदन ! ॥

इति स्थापयेत् ।

"ॐ त्रैलोक्यपतीनां पतये देवदेवाय हृषीकेशाय विष्णवे नमः एषोऽर्घं ॐ नमो नारायणाय नमः" इति मन्त्रेणार्घं दद्यात् ।

ॐ—पाद्यं पादाय देवेश[1] पद्मनाभ सनातन ।
विष्णो कमलपत्राक्ष गृहाण मधुसूदन ॥

इदं पाद्यं ॐ नमो नारायणाय नमः" इति मन्त्रेण पाद्यं दद्यात् ।

ॐ—मधुपर्कं महादेव ब्रह्माद्यैः कल्पितं तव ।
मया निवेदितं भक्त्या गृहाण परमेश्वर ॥

एष मधुपर्कः—ॐ नमो नारायणाय नम इति मन्त्रेण मधुपर्कं दद्यात् ।

"ॐ—मन्दाकिन्यास्तु ते[2] वारि सर्व्वपापहरं शिवम् ।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम् ॥

इदमाचमनीयं ॐ नमो नारायणाय नमः" इति मन्त्रेणाचमनीयं दद्यात् ।

"ॐ—त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च ।
लोकसन्धृतिमात्रेण वारिणा स्नापयाम्यहम् ॥

---

(१) क ख पुस्तकद्वये—पाद्यन्तु पादयोर्देव ।

(२) घ पुस्तके सितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदं स्नानीयम् ॐ नमो नारायणाय नमः” इति मन्त्रेण स्नानीयं दद्यात् ।

“ॐ—देव त्वं वाससा युक्तो यज्ञवर्णसमन्वितः[1] ।
स्वर्णवर्णप्रभे देव वाससी तव केशव ॥

इदं वस्त्रम् ॐ नमो नारायणाय नमः” इति मन्त्रेण वस्त्रं दद्यात् ।

ॐ – शरीरन्ते न जानामि चेष्टाञ्चैव च केशव ।
मया निवेदितान् गन्धान् प्रतिगृह्य विलिप्यताम् ॥

इदमनुलेपनम् ॐ नमो नारायणाय नमः” इति मन्त्रेण गन्धं दद्यात् ।

“ॐ—ऋग्यजुःसाममन्त्रेण निवृत्तं[2] पद्मयोनिना ।
सावित्रीग्रन्थिसंयुक्तमुपवीतं तवाच्युत ॥

इदमुपवीतम् ॐ नमो नारायणाय नमः” इति मन्त्रेण उपवीतं दद्यात् ।

“ॐ दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः ।
गात्राणि ते शोभयन्तु अलङ्काराश्च केशव ॥

इदमाभरणम् ॐ नमो नारायणाय नमः,” इति मन्त्रेणाभरणं दद्यात् ।

---

(१) घ पुस्तके—देवतत्वसमायुक्त यज्ञकर्म्मसमन्वित- ।
(२) ग पुस्तके—त्रिवृतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः पूजा ।

तत्र—

ॐ ॐ नमः । ॐ न नमः । ॐ मो नमः । ॐ ना नमः । ॐ रा नमः । ॐ य नमः । ॐ णा नमः । ॐ य नमः । इति व्यस्तेन प्रत्येकं सम्पूज्य ततः समस्तेन "ॐ नमो नारायणाय नमः" इति मन्त्रेण पूजयेत् ।

तत ॐ नमो भगवते वासुदेवाय नम इति द्वादशाक्षरमन्त्रेण पूजयेत् ।

ॐ—वनस्पतिरसो दिव्यो गन्धाढ्यः सुरभिश्च ते[१] ।
मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥

एष धूप ॐ नमो नारायणाय नमः, इति मन्त्रेण धूपं दद्यात् ।

ॐ—सूर्य्याचन्द्रमसोर्ज्योतिर्विद्युदग्न्योस्तथैव च ।
त्वमेव ज्योतिषां देव दीपोऽयं प्रतिगृह्यताम् ॥

एष दीप ॐ नमो नारायणाय नमः, इति मन्त्रेण दीपं दद्यात् ।

ॐ—अन्नं चतुर्व्विधञ्चैव रसैः षड्भिः समन्वितम् ।
मया निवेदितं भक्त्या नैवेद्यं तव केशव ॥

ॐ नमो नारायणाय नमः, इति मन्त्रेण नैवेद्यं दद्यात् ।

---

(१) ग पुस्तके—सुमनोहरः ।

(४) घ पुस्तके—तवार्पये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं सम्पूज्य पूर्व्वदले वासुदेवं, दक्षिणे सङ्कर्षणं, पश्चिमदले प्रद्युम्नम्, उत्तरदले अनिरुद्धम्, आग्नेयदले वाराहं, नैर्ऋतदले नरसिंहं, वायव्यदले माधवम्, ईशानदले त्रिविक्रमं न्यसेत् ।

ततः साधकाभिमुखस्याष्टाक्षरस्य देवस्य पुरतो गरुड़ं, दक्षिणे महागदां, वामे शार्ङ्गं धनुः, दक्षिणे इषुधी, वामे शङ्खं, दक्षिणपार्श्वे श्रियं, वामपार्श्वे पुष्टिं न्यसेत् ।

ततो वनमालां श्रीवत्सकौस्तुभान् हृदयस्थले न्यसेत् चक्रादिन्यासोऽष्टदिक्षु ।

ततः प्राच्यामिन्द्रम्, आग्नेय्यामग्निं, दक्षिणे यमं, नैर्ऋत्यां निर्ऋतिं, पश्चिमायां वरुणं, वायव्यां वायुम्, उत्तरस्यां धनदम्, ऐशान्यामीशानम्, अधोऽनन्तम्, ऊर्द्धे ब्रह्माणं न्यसेत् ।

ततो न्यासस्थानेषु वासुदेवादीन् ब्रह्मान्तान् पूजयेत् । तथा हि—

ॐ वासुदेवाय नमः, ॐ सङ्कर्षणाय नमः, ॐ प्रद्युम्नाय नमः, ॐ अनिरुद्धाय नमः, ॐ वराहाय नमः, ॐ नरसिंहाय नमः, ॐ माधवाय नमः, ॐ त्रिविक्रमाय नमः, ॐ गरुड़ाय नमः, ॐ महागदायै नमः, ॐ शार्ङ्गाय धनुषे नमः, ॐ इषुधिभ्यां नमः, ॐ शङ्खाय नमः । ॐ श्रियै नमः, ॐ पुष्ट्यै नमः, ॐ वनमालायै नमः, ॐ श्रीवत्साय नमः, ॐ कौस्तुभाय नमः । ॐ इन्द्राय नम, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋतये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ धनदाय नमः, ॐ ईशानाय नमः, ॐ अनन्ताय नमः, ॐ ब्रह्मणे नमः । एवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्यानेन यथा सम्पूज्य प्रकृतपरिकरसम्पन्ननारायणदर्शनस्याव्यय-विष्णुप्रवेशफलमतस्तत्तदा कर्त्तव्यम्।

ततः पद्म-शङ्ख-श्रीवत्स-गदा-गरुड़-कौस्तुभ-चक्र-शार्ङ्गमुद्राः प्रदर्श्याष्टाक्षरमन्त्रमष्टोत्तरशतमष्टाविंशतिमधिकं वा जपित्वा—

ॐ— गच्छ गच्छ परं स्थानं पुराण पुरुषोत्तम।
यत्र ब्रह्मादयो देवा विन्दन्ति परमं पदम्॥

इति

पूजितं विष्णुं शिरसा प्रणम्य—

प्राणस्त्वं सर्व्वभूतानां योनिश्च सरितां पते।
तीर्थराज नमस्तेऽस्तु त्राहि मामच्युतप्रिय॥

इति पठित्वा सागरं प्रसादयेत्।

ततो रामं कृष्णं सुभद्रां प्रणिपतेदिति पुरुषोत्तमक्षेत्रे सागर-स्नानपूर्व्वक नारायणार्च्चनविधिः।

ततः इन्द्रद्युम्नसरो गत्वा—"ॐ अद्य दशाश्वमेधजन्यफल-समफलप्राप्ति-सप्तपूर्व्व-सप्तापर-वंशोद्धरणपूर्व्वक-कामगविमान-करणक-देववद्विष्णुलोकगमन-तदधिकरणकाचन्द्रतारक-बहुवर-भोगोपभोग-तदुत्तरैतल्लोकगमनपूर्व्वक-मोक्षप्राप्तिकामो ब्रह्म-पुराणोक्तविधिना इन्द्रद्युम्नसरःपितृपिण्डदान-पुरुषोत्तमपूजना-न्यहं करिष्ये।

इति सङ्कल्प्य इन्द्रद्युम्नसरसि आचम्य हरिं ध्यात्वा ॐ नमो नारायणायेति मन्त्रजपेन हरिमुपस्थाय जलं प्रविश्य विधिवत् स्नात्वा शेषे—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ— अश्वमेधाङ्गसम्भूत तीर्थं सर्व्वाघनाशन ।
स्नानं त्वयि करोम्यद्य पापं हर नमोऽस्तु ते ॥

इति पठित्वा स्नात्वा देवर्षितर्पणं सयवोदकेन, पितृतर्पणं सतिलोदकेन कृत्वाऽऽचम्य मौनी स्वगृह्योक्तरीत्या षट्पुरुषपिण्डान् दत्त्वा पुरुषोत्तमं पूजयेत् ।

सागरतीरे च स्नान-दान-होम-जप देवार्च्चनादि यदेव क्रियते तदक्षयं भवति ।

उपरागे संक्रान्त्यां, युगादौ, तिथिक्षये, व्यतीपाते, आषाढ्यां, कार्त्तिक्यां, माघ्यां, पर्व्वणि एतदन्यस्मिन् वा काले यदन्यतीर्थे स्नानादि तत्तदा सागरे सहस्रगुणं भवति ।

यदा कदाचिदपि सागरतीरे पिण्डदानमक्षयपितृतृप्ति-फलकमिति ।

एवं कृत्वा पञ्चतीर्थीमेकादश्यामुपोषितः ।
ज्यैष्ठस्य शुक्लद्वादश्यां यः पश्येत् पुरुषोत्तमम् ॥
स पूर्व्वोक्तं फलं प्राप्य क्रीड़ित्वा चाच्युतालये ।
प्रयाति परमं स्थानं यस्मान्नावर्त्तते पुनः ॥

पञ्चतीर्थी तु—मार्कण्डेयसरोऽक्षयवटः सागर इन्द्रद्युम्नसरः रौहिणेयश्चेति । तेनादौ मार्कण्डेयह्रदे विधिवत् स्नानं, ततोऽक्षयवटप्रदक्षिणं, ततो विधिवत् सागरस्नानं, तत इन्द्रद्युम्नह्रदे विधिवत् स्नानं, ततो रौहिणेयदर्शनमित्येकादश्यामारब्धोपवासस्य पञ्चकर्म्माणि ततो द्वादश्यां देवार्च्चनान्तं नित्यकर्म्म कृत्वा पुरुषोत्तमदर्शनमिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्व्वोक्तमिति—पञ्चतीर्थी[1] विना कृतपुरुषोत्तमदर्शने पूर्व्वं यत् फलमुक्तं तदित्यर्थः।

क्रीड़ित्वेत्यादि ततोऽधिकमप्यत्र फलं भवतीत्यर्थः।

तदयमत्र प्रयोगः—

ॐ ज्यैष्ठशुक्लद्वादश्यधिकरणक-पुरुषोत्तमदर्शनजन्यफलप्राप्त्य-च्युतालयक्रीड़नपूर्व्वक-पुनरावृत्तिरहितपरमालयगमनकाम एकादश्यामारब्धोपवासः पञ्चतीर्थीकर्म्म कृत्वा ज्यैष्ठशुक्लद्वादश्यां पुरुषोत्तमदर्शनमहङ्करिष्ये" इति सङ्कल्प्य एकादश्यां पञ्चतीर्थीं कृत्वोपवसेत्।

द्वादश्यां पुरुषोत्तमं पश्येत् ततः पारणेति।

ब्रह्मपुराणे।

ब्रह्मोवाच—तथा—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्यामि समासतः।
ज्यैष्ठमासं [2]तथा तेभ्यः प्रशंसामि पुनः पुनः॥
पृथिव्यां यानि तीर्थानि सरितश्च सरांसि च।
पुष्करिण्यस्तड़ागानि वाप्यः कूपास्तथा ह्रदाः॥
नाना नद्यः समुद्राश्च सप्ताहं पुरुषोत्तमे।
ज्यैष्ठ-शुक्लदशम्यादि प्रत्यक्षं यान्ति सर्व्वदा॥
स्नानदानादिकं तस्माद्देवताप्रेक्षणं द्विजाः।
यत्किञ्चित् क्रियते तत्र तस्मिन् कालेऽक्षयं भवेत्॥

---

(१) ग पुस्तके—तीर्थम्।

(२) ग पुस्तके यथा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुक्लपक्षस्य दशमी ज्यैष्ठे मासि द्विजोत्तमाः ।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥
यस्तस्यां हलिनं कृष्णं पश्येद्भद्रां सुसंयतः ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं व्रजेन्नरः ॥
उत्तरे दक्षिणे विप्रास्त्वयने पुरुषोत्तमम् ।
दृष्ट्वा रामं सुभद्राञ्च विष्णुलोकं व्रजेन्नरः ॥
नरो दोलाग(यि)तं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥
विषुवद्दिवसे प्राप्ते पञ्चतीर्थीं विधानतः ।
कृत्वा सङ्कर्षणं कृष्णं दृष्ट्वा भद्राञ्च भो द्विजाः ॥
नरः समस्तयज्ञानां फलं प्राप्नोति दुर्लभम् ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोकञ्च गच्छति ॥
यः पश्यति तृतीयायां कृष्णं चन्दनभूषितम्[२] ।
वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम् ॥
ज्यैष्ठ्यां ज्येष्ठर्क्षयुक्तायां यः पश्येत् पुरुषोत्तमम् ।
कुलैकविंशानुद्धृत्य विष्णुलोकं स गच्छति ॥

तथा तत्रैव—

यदा भवेन्महाज्यैष्ठी राशिनक्षत्रयोगतः ।
प्रयत्नेन तदा मर्त्त्यैर्गन्तव्यं पुरुषोत्तमम् ॥
कृष्णं दृष्ट्वा महाज्यैष्ठ्यां रामं भद्राञ्च भो द्विजाः ।
नरो द्वादशयात्रायाः फलं प्राप्नोति चाधिकम् ॥

---

(२) घ पुस्तके—रूषितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयागे च कुरुक्षेत्रे पुष्करे नैमिषे गये।
गङ्गाद्वारे [1]च कुब्जाम्रे गङ्गासागरसङ्गमे॥
कोकामुखे शूकरे च मथुरायां मरुस्थले।
शालग्रामे वायुतीर्थे मन्दारे सिन्धुसागरे॥
पिण्डारके चित्रकूटे प्रभासे कनखले तथा।
[2]गङ्गाद्वारे द्वारकायां तथा बदरिकाश्रमे॥
[3]लोहदण्डे चाश्वतीर्थे सर्व्वपापविमोचने।
[4]कर्द्दमाले कोटितीर्थे तथा चामरकुण्डके[5]॥
[6]लोहाकुले चेक्षुमार्गे सोमतीर्थे पृथूदके।
उत्पलावर्त्तके चैव पृथूत्तुङ्गे सकुब्जके॥
एकाम्रके च केदारे काश्याञ्च विरजे द्विजाः।
कालञ्जरे च गोकर्णे श्रीशैले गन्धमादने॥
महेन्द्रे मलये विन्ध्ये पारिपात्रे हिमालये।
सह्ये च शुक्तिमन्ते च गोमन्ते चार्व्वुदे तथा॥
गङ्गायां सर्व्वतीर्थेषु यामुनेषु च भो द्विजाः।
सारस्वतेषु गोमत्यां ब्रह्मपुत्रेषु सप्तसु॥

---

(१) ग पुस्तके कुशावर्त्ते।
(२) घ पुस्तके शङ्खोद्धारे।
(३) घ पुस्तके—कुण्डे।
(४) घ पुस्तके कामालये।
(५) ग पुस्तके अमरकण्टके।
(६) ग पुस्तके—लोहार्गले जम्बुतीर्थे।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोदावरी भीमरथी तुङ्गभद्रा च नर्म्मदा ।
तापी पयोष्णी कावेरी शिप्रा चर्म्मण्वती द्विजाः ॥
वितस्ता चन्द्रभागा च शतद्रुर्वाहुदा तथा ।
ऋषिकुल्या कुमारी च विपाशा च दृषद्वती ॥
सरयूर्वरगङ्गा च गण्डकी च महानदी ।
कौशिकी करतोया च त्रिस्रोता मधुवर्त्तिनी[1] ॥
महानदी वैतरणी याश्चान्या नानुकीर्त्तिताः ।
अथ किं बहुनोक्तेन भाषितेन द्विजोत्तमाः ॥
पृथिव्यां सर्व्वतीर्थेषु हरेश्चायतनेषु च ।
सागरेषु च शैलेषु नदीषु चापरासु च[2] ॥
यत् फलं स्नानदानेन राहुग्रस्ते दिवाकरे ।
तत् फलं कृष्णमालोक्य महाज्यैष्ठ्यां लभेन्नरः ॥
तस्मात् सर्व्वप्रयत्नेन गन्तव्यं पुरुषोत्तमम् ।
महाज्यैष्ठ्यां मुनिश्रेष्ठाः सर्व्वकामफलेप्सुभिः ॥
दृष्ट्वा रामं महाज्यैष्ठ्यां कृष्णं सह सुभद्रया ।
विष्णुलोकं नरो याति समुद्धृत्य कुलं शतम् ॥
भुक्त्वा तत्र वरान् भोगान् यावदाहूतसंप्लवम् ।
पुण्यक्षयादिहागत्य चतुर्वेदी द्विजो भवेत् ॥

---

(१) घ पुस्तके—वाहिनी ।

(२) ख घ पुस्तके सरःसु च, ग पुस्तके पयःसु च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वधर्म्मनिरतः शान्तः कृष्णभक्तो जितेन्द्रियः ।
वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् ॥

इति महाज्यैष्ठी ॥

अथैतत्प्रयोगः—

"ॐ अद्य ज्यैष्ठपूर्णिमायां ज्येष्ठानक्षत्रयुक्तायां वृषराशिस्थे भास्करे द्वादशयात्राजन्यफलाधिकफलप्राप्तिकामः कृष्ण-राम-सुभद्रा-दर्शनमहं करिष्ये" इति सङ्कल्प्य तान् पश्येत् ।

अथवा—

कुलशतोद्धरणपूर्व्वक-विष्णुलोकगमन-तदधिकरणाहूतसंप्लव-पर्य्यन्त-वरबहुभोगोपभोगतदुत्तरैहिकचतुर्व्वेदि-स्वधर्म्मनिरतशान्त-कृष्णभक्त-जितेन्द्रियविप्रलभवनोत्तर-वैष्णवयोगप्राप्तिपूर्व्वक-मोक्षावाप्तिकामो वा कृष्णरामसुभद्रादर्शनमहं करिष्ये ।

ॐ अद्य ज्यैष्ठपूर्णिमायां ज्येष्ठानक्षत्रयुक्तायां वृषराशिस्थे सवितरि पृथिव्यधिकरणकसकलतीर्थ-नारायणायतन-सागरशैल-नदी-सरोऽधिकरणक--रविग्रहकालीनस्नानदानजन्यफलसमफल-प्राप्तिकामो वा कृष्णदर्शनमहं करिष्ये ।

तथा—

ब्रह्मपुराणे ।

मुनय ऊचुः—

कस्मिन् काले भवेत् स्नानं कृष्णस्य कमलोद्भव ।
तथा तत्कारयन्तीह स्नानं तस्य विधिं वद[१] ॥

(१) मूले--विधिना केन तद्ब्रूहि ततो विधिविदांवर ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मोवाच—

शृणुध्वं मुनयः स्नानं कृष्णस्य वदतो मम ।
रामस्य च सुभद्रायाः पुण्यं सर्व्वाघनाशनम् ॥
[१]मासि ज्यैष्ठे च सम्प्राप्ते नक्षत्रे चन्द्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्व्वकालं हरेर्द्विजाः ॥
सर्व्वतीर्थमयः कूपस्तत्राऽऽस्ते निर्म्मलः शुचिः ।
तदा भोगवती तत्र [२]प्रत्यक्षं भवति द्विजाः ॥
तस्माज्जैरष्ठ्यां समुद्धृत्य हैमाद्यैः कलसैर्जलम् ।
कृष्णरामाभिषेकार्थं सुभद्रायाश्च भो द्विजाः ॥
कृत्वा सुशोभनं मञ्चं पताकाभिरलङ्कृतम् ।
सुदृढ़ं सुखसञ्चारं वस्त्रैः पुष्पैरलङ्कृतम् ॥
विस्तीर्णं धूपितं धूपैः स्नानार्थं रामकृष्णयोः ।
सितवस्त्रपरिच्छन्नं मुक्ताहारावलम्बितम् ॥
तत्र नानाविधैर्वाद्यैः कृष्णं नीलाम्बरं द्विजाः ।
मध्ये [३]सुभद्राञ्चास्थाप्य जयमङ्गलनिःस्वनैः ॥
ब्राह्मणैः क्षत्रियैर्व्वैश्यैः शूद्रैश्चान्यैश्च जातिभिः ।
अनेकशतसाहस्रैर्वृतं स्त्रीपुरुषैर्द्विजाः ॥
गृहस्थाः स्नातकाश्चैव यतयो ब्रह्मचारिणः ।
स्नापयन्ति तदा कृष्णं मञ्चस्थं सहलायुधम् ॥

---

(१) घ पुस्तके मासे ।

(२) ग पुस्तके प्रत्यक्षा ।

(३) ख पुस्तके—स्थाप्य मञ्चे सुभद्राञ्च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा समस्ततीर्थानि पूर्व्वोक्तानि द्विजोत्तमाः ।
स्वोदकैः पुष्पमिश्रैश्च स्नापयन्ति पृथक् पृथक् ॥
पश्चात् [1]पटहसङ्घातैर्भेरी-मुरजनिस्वनैः ।
काहलैस्तालशब्दैश्च मृदङ्गैर्विविधैस्तथा ॥
अन्यैश्च विविधैर्वाद्यै[2]र्घण्टास्वनविभूषितैः ।
स्त्रीणां मङ्गलशब्दैश्च स्तुतिशब्दैर्मनोहरैः ॥
नानास्तोत्ररवैः पुण्यैः सामशब्दोपबृंहितैः ।
यतिभिः स्नातकैश्चैव गृहस्थैर्ब्रह्मचारिभिः ॥
स्नानकाले सुरश्रेष्ठं स्तुवन्ति परया मुदा ।
[3]श्यामावदातवेश्याभिः कुचभारावनामिभिः ॥
पीतरक्ताम्बराभिश्च माल्यदामावनामिभिः ।
सरत्नैः कुण्डलैर्दिव्यैः सुवर्णस्तवकान्वितैः ॥
चामरै रुक्म[4]दण्डैश्च वीज्येते रामकेशवौ ।
यक्ष-विद्याधरैः सिद्धैः किन्नरैरप्सरोगणैः ॥
परिवार्य्याम्बरगतैर्देव-गन्धर्व्व-चारणैः ।
आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
लोकपालास्तथान्ये च स्तुवन्ति पुरुषोत्तमम् ॥

---

(१) घ पुस्तके शङ्खाद्यैः । ग पुस्तके झर्झरैः ।

(२) ग पुस्तके घोषैः ।

(३) घ पुस्तके श्यामैर्वैश्याजनैश्चैव ।

(४) मूलपुस्तके रत्न- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नमस्ते देवदेवेश पुराण पुरुषोत्तम ।
स्वर्गस्थित्यन्तकृद्देव लोकनाथ जगत्पते ॥
त्रैलोक्यधारिणं देवं [1]ब्रह्माणं मोक्षकारणम् ।
तं नमस्यामहे भक्त्या सर्व्वकामफलप्रदम् ॥
स्तुत्वैवं विबुधाः कृष्णं रामञ्चैव महाबलम् ।
सुभद्राञ्च मुनिश्रेष्ठास्तदाकाशे व्यवस्थिताः ॥
गायन्ति देवगन्धर्व्वा नृत्यन्त्यप्सरसस्तथा ।
देवतूर्य्याण्यवाद्यन्त वाता वान्ति सुशीतलाः ॥
पुष्पमिश्रं तदा मेघा वर्षन्त्याकाशगोचराः ।
जयशब्दञ्च कुर्व्वन्ति मुनयः सिद्ध-चारणाः ॥
शक्राद्या विबुधाः सर्व्वे ऋषयः पितरोऽव्ययाः ।
प्रजानां पतयो नागा ये चान्ये स्वर्गवासिनः ॥
ततो मङ्गलसम्भारैर्विधिमन्त्रपुरस्कृतम् ।
आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ॥
इन्द्रो विष्णुर्महावीर्य्यो सूर्य्या चन्द्रमसौ तथा ।
धाता चैव विधाता च तथा चैवानिलाऽनलौ ॥
पूषा भगोऽर्य्यमा त्वष्टा अंशुनैव विवस्वता ।
पत्नीभ्यां[2] सहितो धीमान् मित्रेण वरुणेन च ॥
रुद्रैर्वसुभिरादित्यैरश्विभ्याञ्च वृतः प्रभुः ।
विश्वैर्देवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥

---

(१) क ग पुस्तके त्रैलोक्यवरणं देवं ब्रह्माण्यम् ।
(२) घ पुस्तके रुद्राश्वि— ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गन्धर्व्वैरप्सरोभिश्च यक्ष-राक्षस-पन्नगैः ।
देवर्षिभिरसंख्येयैस्तथा ब्रह्मर्षिभिर्वरैः ॥
वैखानसैर्व्वालि(ल)खिल्यैर्वाय्वाहारैर्मरीचिपैः ।
भृगुभिश्चाङ्गिरोभिश्च[1] सर्व्वविद्यासुनिष्ठितैः ॥
सर्व्वविद्याधरैः पुण्यैर्य्योगसिद्धिभिरावृतः ।
पितामहः पुलस्त्यश्च पुलहश्च महातपाः ॥
अङ्गिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ।
क्रतुर्हरः प्रचेताश्च मनुर्दक्षस्तथैव च ॥
ऋतवश्च[2] ग्रहाश्चैव ज्योतींषि च द्विजोत्तमाः ।
मूर्त्तिमत्यश्च सरितो वेदाश्चैव सनातनाः ॥
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च ।
पृथिवी द्यौर्द्दिशश्चैव पादपाश्च द्विजोत्तमाः ॥
अदितिर्देवमाता च श्रीः स्वाहा च[3] सरस्वती ।
उमा गौरी[4]सिनीवाली तथा चानुमतिः कुहूः ॥
राका च धिषणा चैव पत्नयश्चान्या दिवौकसाम् ।
हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकवीर्य्यवान्[5] ॥
ऐरावतः सानुचरः कलाकाष्ठास्तथैव च ।
मासार्द्धं मास ऋतवस्तथा रात्र्यहनी समाः ॥

---

(१) ग पुस्तके—यतिभिश्च ।
(२) घ पुस्तके—ईश्वराश्च ।
(३) ख पुस्तके—ह्रीः श्रीः स्वाहा ।
(४) क पुस्तके—माटो ।
(५) घ पुस्तके—मृङ्गवान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उच्चैःश्रवा[1]हयश्रेष्ठो नागराजश्च वामनः ।
अरुणो गरुड़श्चैव वृक्षाश्चौषधिभिः सह ॥
धर्म्मश्च भगवान् देवः[2] समाजग्मुर्हि सङ्गताः ।
गृहीत्वा ते तदा विप्रा देवाः सर्व्वे दिवौकसः ॥
आभिषेचनिकं द्रव्यं मङ्गलानि च सर्व्वशः ।
दिव्यसम्भारसंयुक्तैः कलशैः काञ्चनैर्द्विजाः ॥
सारस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेव च ।
तोयेनाकाशगङ्गायाः कृष्णं रामेण सङ्गतम् ॥
सपुष्पैः काञ्चनैः कुम्भैः स्नापयन्त्यम्बरे स्थिताः[3] ।
सञ्चरन्ति विमानानि देवानामम्बरे तथा ॥
उच्चावचानि दिव्यानि कामगानि स्थिराणि च ।
दिव्यरत्नविचित्राणि सेवितान्यप्सरोगणैः ॥
गीतैर्वाद्यैः पताकाभिः शोभितानि समन्ततः ।
एवं तदा मुनिश्रेष्ठाः कृष्णं रामेण सङ्गतम् ।
स्नापयित्वा सुभद्राञ्च संस्तुवन्ति मुदाऽन्विताः ॥
जय जय लोकपाल भक्तरक्षक ।
जय पद्मनाभ जय भूधरण[4] ॥

---

(१) क ख ग पुस्तके—ह्राह्राङ्ह ।

(२) मूल पुस्तके—देवैः ।

(३) ग पुस्तके—स्नापयन्त्यवनिस्थिताः ।

(४) ख पुस्तके—भूतचरण ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जय जय चाऽऽदिदेव जय बहुकरण[1] ।
जय वासुदेव जय चाऽऽदिकारण ॥
जय जय दिव्यमीन जय त्रिदशवर ।
जय जय जलधिशयन जय योगिवर ॥
जय जय सूर्य्यानुज[2] जय देवराज ।
जय जय कैटभारे जय वेदवर[3] ॥
जय जय कूर्म्मरूप जय यज्ञवर[4] ।
जय जय कमलनाभ जय शैलधर ॥
जय जय योगशयन जय वेगधर ।
जय जय विश्वमूर्त्ते जय चक्रधर ॥
जय जय भूतनाथ जय धरणीधर
जय जय शेषशायिन् जय पीतवासः ! ।
जय जय सोमकान्त जय योगवास
जय जय दैत्यदहन जय धर्म्मवास ॥
जय जय गुणनिधान जय श्रीनिवास ।
जय जय गरुड़गमन जय सुखनिवास ।
जय जय धर्म्मकीतो जय [5]यतिनिवास जय जय गहनवास[6] ॥

---

(१) ग पुस्तके—कारण ।
(२) ग पुस्तके—सूर्य्यनेत्र ।
(३) ख पुस्तके—वैद्यवर ।
(४) घ पुस्तके—यज्ञरूप ।
(५) घ पुस्तके—महीनिवास ।
(६) ग पुस्तके—भवाब्धिवास ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जय जय योगिगम्य जय जय मखनिवास
जय जय वेदवेद्य जय शान्तिकर
जय जय योगिचिन्त्य जय पुष्टिकर।
जय जय ज्ञानमूर्त्ते जय कमलाकर॥
जय जय [1]भाववेद्य जय मुक्तिकर
जय जय विमलदेह जय सत्त्वनिलय।
जय जय प्रीतिकर जय गुणसमूह[2]
जय जय यज्वक जय गुणविहीन॥
जय जय मोक्षकर जय भूशरण्य
जय जय कान्तियुत जय लोकशरण।
जय जय लक्ष्मीयुत जय पङ्कजाक्ष
जय जय भोगयुत जय नीलाम्बर॥
जय जय योगयुत जयाऽतसीकुसुम-
श्यामदेह जय जय समुद्रनिविष्टगेह[3]।
जय जय लोककान्त[4] जय परमशान्त
जय परमसार जय चक्रधर जय शान्तिकर।
जय जय मोक्षकर जय कलुषहर।

---

(१) मूले—भववैद्य।

(२) क पुस्तके—समुद्र। घ पुस्तके—समूह।

(३) घ पुस्तके—सप्तसमुद्रविष्टदेह।

(४) घ पुस्तके—जय लोककान्त।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जय कृष्ण जगन्नाथ जय सङ्कर्षणानुज ।
जय पद्मपलाशाक्ष जय वाञ्छाफलप्रद ॥
जय मालावृतोरस्क जय चक्रगदाधर ।
जय पद्मालयाकान्त जय विष्णो नमोऽस्तु ते ॥

ब्रह्मोवाच—

एवं स्तुत्वा तदा देवाः शक्राद्याः हृष्टमानसाः ।
सिद्धचारणसङ्घाश्च ये चान्ये स्वर्गवासिनः ॥
मुनयो वालिखिल्याश्च कृष्णं रामेण सङ्गतम् ।
सुभद्राञ्च मुनिश्रेष्ठाः प्रणिपत्याम्बरे स्थिताः ॥
दृष्ट्वा स्पृष्ट्वा(1) नमस्कृत्वा तदा ते त्रिदिवौकसः ।
कृष्णं रामं सुभद्राञ्च यान्ति स्वं स्वं निवेशनम् ॥
सञ्चरन्ति विमानानि देवानामम्बरे तदा ।
उच्चावचानि दिव्यानि कामगानि स्थिराणि च ॥
दिव्यरत्नविचित्राणि सेवितान्यप्सरोगणैः ।
गीतैर्वाद्यैः पताकाभिः शोभितानि समन्ततः ॥
तस्मिन् काले च ये मर्त्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम् ॥
सुभद्रा-रामसहितं मञ्चस्थं पुरुषोत्तमम् ।
दृष्ट्वा नरोऽव्ययं स्थानं याति नास्त्यत्र संशयः ॥
कपिलाशतदानेन यत् फलं पुष्करे स्मृतम् ।
तत् फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥

---

(1) घ पुस्तके—स्तुत्वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृषोत्सर्गेण विधिवद्यत् फलं समुदाहृतम् ।
तत् फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥
दानेन घृतधेन्वाश्च यत् फलं समुदाहृतम् ।
तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥
चान्द्रायणेन चीर्णेन विधिवत् यत् फलं स्मृतम् ।
तत् फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥
अथ किं बहुनोक्तेन भाषितेन पुनः पुनः ।
तस्य देवस्य माहात्म्यं मञ्चस्थस्य द्विजोत्तमाः ॥
यत् फलं सर्व्वतीर्थेषु व्रतैर्दानैश्च कीर्त्तितम् ।
तत् फलं कृष्णमालोक्य मञ्चस्थं सहलायुधम् ॥
सुभद्राञ्च मुनिश्रेष्ठाः प्राप्नोति शुभकृन्नरः ।
तस्मान्नरो वा नारी च पश्येत्तं पुरुषोत्तमम् ॥
ततः समस्ततीर्थानां लभेत् स्नानादिजं फलम् ।
स्नानशेषेण कृष्णस्य तोयेनात्माऽभिषिच्यते ॥
बन्ध्या मृतप्रजा या तु दुर्भगा ग्रहपीड़िता ।
राक्षसाद्यैर्ग्रहीता वा तथा रोगैश्च संहताः ॥
सद्यस्ताः स्नानशेषेण उदकेनाभिषेचिताः ।
प्राप्नुवन्तीप्सितान् कामान् यान् यान् वाञ्छति चेप्सितान् ॥
पुत्रार्थिनी लभेत्पुत्रान् सौभाग्यञ्च सुखार्थिनी ।
रोगार्त्ता मुच्यते रोगाद्धनञ्च धनकाङ्क्षिणी ॥
पुण्यानि यानि तोयानि तिष्ठन्ति धरणीतले ।
तानि स्नानावशेषस्य कलां नार्हन्ति षोड़शीम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मात् स्नानावशेषं यत् कृष्णस्य सलिलं द्विजाः ।
अभ्युक्षेत् सर्व्वगात्राणि सर्व्वकामप्रदं हि तत् ॥
स्नात्वा[1] पश्यन्ति ये कृष्णं व्रजन्तं दक्षिणामुखम् ।
ब्रह्महत्यादिभिः पापैर्मुच्यन्ते नात्र संशयः ॥
शास्त्रेषु यत् फलं प्रोक्तं पृथिव्यास्त्रिप्रदक्षिणैः ।
दृष्ट्वा नरो लभेत् कृष्णं व्रजन्तं दक्षिणामुखम् ॥
तीर्थयात्राफलं यत्तु पृथिव्यां समुदाहृतम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥
वदर्य्यां यत् फलं प्रोक्तं दृष्ट्वा नारायणं नरम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥
गङ्गाद्वारे च कुशाम्रे स्नाने दाने च यत् फलम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥
ग्रस्ते सूर्य्ये कुरुक्षेत्रे स्नाने दाने च यत् फलम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥
प्रयागे तु महामाघ्यां यत् फलं समुदाहृतम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥
शालग्रामे महाचैत्र्यां स्नानदानेन यत् फलम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥
महाभिधेय[2]कार्त्तिक्यां पुष्करे यत् फलं स्मृतम् ।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम् ॥

---

(१) ग पुस्तके—स्नातम् ।
(२) ग घ पुस्तकद्वये—महाभिधान- ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्फलं स्नानदानेन गङ्गाद्वारे च सङ्गमे।
दृष्ट्वा नरो लभेत् कृष्णं तत्फलं दक्षिणामुखम्॥
गङ्गायां सर्व्वतीर्थेषु [1]तथान्येषु च भो द्विजाः।
सारस्वतेषु तीर्थेषु तथान्येषु सरःसु च॥
यत् फलं स्नान-दानेन विधिवत् समुदाहृतम्।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम्॥
पुष्करे चान्यतीर्थेषु गये चामरकण्टके।
नैमिषादिषु तीर्थेषु क्षेत्रेष्वायतनेषु च॥
यत् फलं स्नान-दानेन राहुग्रस्ते दिवाकरे।
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं दक्षिणामुखम्॥
अथ किं पुनरुक्तेन भाषितेन पुनः पुनः।
यत्किञ्चित् कथितञ्चात्र फलं पुण्यस्य कर्म्मणः॥
वेदशास्त्रे पुराणे च भारते च द्विजोत्तमाः।
धर्म्मशास्त्रेषु सर्व्वेषु तथाऽन्यत्र मनीषिभिः॥
दृष्ट्वा नरो लभेत् कृष्णं तत् फलं सहलायुधम्।
सकलं भद्रया सार्द्धं व्रजन्तं दक्षिणामुखम्॥

अथैतत्प्रयोगः—

ॐ अद्य ज्यैष्ठपूर्णिमायामनुराधायुतायामव्ययपदगमनकामो-मञ्चस्थपुरुषोत्तमदर्शनमहं करिष्ये।

इति सङ्कल्प्य मञ्चस्थं पुरुषोत्तमं पश्येत्।

---

(१) ख पुस्तके—यामुनेषु।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं तदा मञ्चस्थबलभद्रस्य मञ्चस्थसुभद्राया अपि दर्शने प्रत्येकमेतदेव फलम्।

पुष्कराधिकरणक-कपिलागवीशतदानजन्यफल-समफलप्राप्ति-कामो वा—

विधिवद्भूमिदानजन्यफल-समफलप्राप्तिकामो वा—

विधिवच्चीर्णचान्द्रायणजन्यफल-समफलप्राप्तिकामो वा—

विधिवन्मासोपवासजन्यफल-समफलप्राप्तिकामो वा—

सर्व्वयज्ञ-व्रत-दानजन्यफल-समफलप्राप्तिकामो वा—

मञ्चस्थ-बलभद्र—सुभद्रासहित-कृष्णदर्शनमहं करिष्ये।

इति सङ्कल्प्य पश्येत्।

अथैतद्दर्शनानन्तरं दक्षिणां दिशं व्रजतः कृष्णस्य दर्शने ब्रह्महत्यादिसकलपापविमुक्तिकामो वा—

पृथिवीप्रदक्षिणत्रयजन्यफल-समफलप्राप्तिकामो वा—

पृथिव्यधिकरणकसकलतीर्थयात्राजन्यफल—समफलप्राप्ति-कामो वा—

बदर्य्यधिकरणक—नर—नारायणदर्शनजन्यफल—समफलप्राप्ति-कामो वा—

गङ्गाद्वारे कुशाम्राधिकरणकस्नानदानजन्यफल-समफलप्राप्ति-कामो वा—

कुरुक्षेत्राधिकरणकसूर्य्यग्रहणकालीनस्नान-दानजन्यफल-सम-फलप्राप्तिकामो वा—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयागाधिकरणक--महामाघीस्नानजन्यफल–समफलप्राप्ति–कामो वा—

शालग्रामक्षेत्राधिकरणक--चैत्रीकालीनस्नानदानजन्यफलसम-फलप्राप्तिकामो वा—

पुष्कराधिकरणक-महाकार्त्तिकीस्नानजन्यफल-समफलप्राप्ति-कामो वा—

गङ्गाद्वार-गङ्गायमुनासङ्गम-गङ्गासागरसङ्गमाधिकरणकस्नान-जन्यफल-समफलप्राप्तिकामो वा--

सकलतीर्थाधिकरणकविधिवत्स्नानदानजन्यफलसमफलप्राप्ति-कामो वा—

पुष्करादितीर्थ-नैमिषाद्यरण्य–प्रयागादिक्षेत्र-पुरुषोत्तमाद्या-यतनाधिकरणक--रविग्रहणकालीनस्नानजन्यफल–समफलप्राप्ति-कामो वा—

वेदशास्त्र-पुराण-भारत-धर्म्मशास्त्राद्युक्ताशेषपुण्यकर्म्मफल-सम-फलप्राप्तिकामो वा—

दक्षिणाभिमुखव्रजद्बलभद्र-सुभद्रासहित कृष्णदर्शनमहङ्करिष्ये ।

इति सङ्कल्प्य दक्षिणाशां व्रजतस्तान् पश्येत् ।

तथा—तत्रैव

इन्द्रद्युम्नसरो नाम तीर्थं यज्ञाङ्गसम्भवम् ।
यत्र स्नात्वा सकृल्लोकः शक्रलोकमवाप्यते ॥
दापयिष्यति यः पिण्डांस्तस्यैव सरसस्तटे ।
कुलैकविंशानुद्धृत्य शक्रलोकं गमिष्यति ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूज्यमानोऽप्सरोभिश्च गन्धर्व्वैर्गीतनिःस्वनैः।
विमानेन वसेत्तत्र यावदिन्द्राश्चतुर्द्दश॥
सरसो दक्षिणे भागे नैर्ऋत्यां तु समाश्रिते।
न्यग्रोधस्तिष्ठते तत्र तत्समीपे तु मण्डपः॥
आषाढ़स्य सिते पक्षे पञ्चम्यां पितृदैवते।
ऋक्षे नेष्यन्ति मां तत्र नीत्वा सप्तदिनानि वै॥
ततः स्नात्वा च दृष्ट्वा च संप्रणम्य च भक्तितः।
नरो वर्षायुतं दिव्यं श्रीमन्नरिपुरे वसेत्॥
पूज्यमानोऽप्सरोभिश्च गन्धर्व्वैर्गीतनिःस्वनैः।
हरेरनुचरस्तत्र क्रीड़ते केशवेन वै॥
विमानेनार्कवर्णेन रत्नहारेण भ्राजता।
सर्व्वकाममहाभोगैस्तिष्ठते भवनोत्तमे॥
तपःक्षयादिहागम्य मनुष्यो ब्राह्मणो भवेत्।
कोटीधनपतिः श्रीमांश्चतुर्व्वेदी भवेद्ध्रुवम्॥
तद्दर्शन-प्रणामैश्च राम-केशवयोस्तथा।
गुण्डिकामण्डपं यान्तं ये पश्यन्ति रथे स्थितम्॥
कृष्णं बलं सुभद्राञ्च ते यान्ति भवनं हरेः।
ये पश्यन्ति तदा कृष्णं सप्ताहं मण्डपे स्थितम्॥
सङ्कर्षणं सुभद्राञ्च [1]विष्णुलोकं व्रजन्ति ते।
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्राश्च वै नृप॥

---

(१) क ख पुस्तकद्वये—विधिवत्सुसमाहिताः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैर्वरैः ।
उपहारैर्बहुविधैरुपवासैः प्रदक्षिणैः ॥
जयशब्दैस्तथा स्तोत्रैर्गीतैर्वाद्यैर्मनोहरैः ।
न तेषां दुर्लभं किञ्चित् फलं तस्य यदीप्सितम् ॥
भविष्यति नृपश्रेष्ठ मत्प्रसादादसंशयम् ।
एवमुक्ता तु तं देवस्तत्रैवान्तरधीयत ॥
तस्मात्सर्व्वप्रयत्नेन गुण्डिकायां द्विजोत्तमाः ।
सर्व्वकामप्रदं देवं पश्येत्तं पुरुषोत्तमम् ॥
अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् ।
रोगाद्विमुच्यते रोगी कन्या प्राप्नोति सत्पतिम् ॥
आयुः कीर्त्तिं यशो मेधां बलं विद्यां धृतिं पशून् ।
नरः सन्ततिमाप्नोति रूपयौवनसम्पदम् ॥
यान् यान् समीहते भोगान्[१] दृष्ट्वा तं पुरुषोत्तमम् ।
नरो वाऽप्यथवा नारी तांस्तान् प्राप्नोत्यसंशयम् ॥
यात्रां कृत्वा गुण्डिका(वा)ख्यां विधिवत्सुसमाहितः ।
आषाढ़स्य सिते पक्षे नरो योषिदथापि वा ॥
दृष्ट्वा कृष्णञ्च रामञ्च सुभद्राञ्च द्विजोत्तमाः ।
दशपञ्चाश्वमेधानां फलं प्राप्नोति चाधिकम् ॥
सप्ताऽवरान् सप्तपरान् वंशानुद्धृत्य चात्मनः ।
कामगेन विमानेन सर्व्वरत्नैरलङ्कृतः ॥
गन्धर्व्वैरप्सरोभिश्च सेव्यमानो यथाऽमरः ॥

(१) घ पुस्तके—कामान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपवान् सुभगः शूरो नरो विष्णुपुरं व्रजेत्।
तत्र भुक्त्वा वरान् भोगान् यावदाहूतसंप्लवम्॥
सर्व्वकामसमृद्धात्मा जरामरणवर्ज्जितः।
पुण्यक्षयादिहाऽऽगत्य चतुर्व्वेदी द्विजो भवेत्॥
वैष्णवं योगमास्थाय[1] ततो मोक्षमवाप्नुयात्।

ॐ अद्य हरिभवनगमनकामो गुण्डिकाभिमुखव्रजद्रथस्थ बलभद्र—सुभद्रासहित कृष्णदर्शनमहं करिष्ये।

इति सङ्कल्प्य-गुण्डिकायान्तु रथस्थितं बलभद्र-सुभद्रासहितं कृष्णं पश्येत्।

अयमत्रप्रयोगः—

ॐ अद्य आषाढ़शुक्लपञ्चम्यां पितृदैवतऋक्षे पञ्चदशाश्वमेध-जन्यफलाधिकफलप्राप्ति—सप्तावरसप्तपरात्मीयवंश्योद्धारपूर्व्वक-कामगविमानकरणक-सर्व्वरत्नालङ्कृत-गन्धर्व्वाप्सरःसेव्यमान-रूपवत् सुभग-शूर-स्वकर्त्तृकामरवद्विष्णुपुरगमन—तदधिकरणकयावदाहूत-संप्लवसर्व्वकामसमृद्ध—जरामरणवर्ज्जितात्मीय—वरबहुभोगोपभोग-तदुत्तरैतल्लौकिक--चतुर्व्वेदिद्विजत्वभवन—वैष्णवयोगप्राप्तिपूर्व्वक—मोक्षावाप्तिकामो गुण्डिकायात्रापूर्व्वक—गुण्डिकामण्डप[2]स्थराम-सुभद्रासहितकृष्णदर्शनमहं करिष्ये।

इति सङ्कल्प्य तत्र गत्वा तान् पश्येत्।

---

(१) ग पुस्तके—आषाद्य। (२) ख पुस्तके—रथस्थ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रैव कृष्णादिपूजने।

ॐ अद्य स्वेष्टामुकफलप्राप्तिकामो ब्रह्मपुराणोक्तविधिना सङ्कर्षण-सुभद्रासहितकृष्णपूजामहं करिष्ये।

इति सङ्कल्प्य गन्धैः पुष्पैर्धूपैर्वरनैवेद्यैर्बहुविधोपहारैः प्रदक्षिणैर्जयशब्दैः स्तोत्रैर्मनोहरवाद्यैस्तद्दिनोपवासेन च पूजयेत्।

तत्रैव ब्रह्मपुराणे—

ब्रह्मोवाच।

गुण्डिका(वा)यां समुत्थाने[1] फाल्गुन्यां विषुवे तथा।
यात्रां कृत्वा विधानेन दृष्ट्वा कृष्णं प्रणम्य च॥
सङ्कर्षणं सुभद्राञ्च लभेत् सर्व्वत्र वै फलम्।
नरो गच्छेत् विष्णुलोके यावदिन्द्राश्चतुर्द्दश॥

तेन गुण्डिकायां यदा कदाचित्–एवमुत्थानद्वादश्यां तथा फाल्गुन्यां तथा जलविषुवे तथा धान्यविषुवे तथा–कृष्णदर्शन-प्रणामयोः, तथा सङ्कर्षणदर्शन-प्रणामयोः, तथा सुभद्रादर्शन-प्रणामयोश्च प्रत्येकं चतुर्द्दशेन्द्रपर्य्यन्तं विष्णुलोकस्थितिः फलमित्यर्थः।

तथा—तत्रैव—

यावद् यात्रां ज्येष्ठमासे करोति विधिवन्नरः।
तावत् कल्पं विष्णुलोके सुखं भुङ्क्ते न संशयः॥

ज्येष्ठमासीयायां कस्यामपि तिथौ यात्रायां कल्पावच्छिन्नविष्णुलोकाधिकरणकसुखभोगः फलमित्यर्थः।

---

(१) घ पुस्तके--तथोत्थाने।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा—तत्रैव ब्रह्मोवाच—

प्रतियात्राफलं विप्राः शृणुध्वं गदतो मम ।
यत् प्राप्नोति नरः कृत्वा तस्मिन् क्षेत्रे सुसंयतः ॥
तस्मिन् क्षेत्रवरे पुण्ये रम्ये श्रीपुरुषोत्तमे ।
भुक्ति-मुक्तिप्रदे नृणां सर्व्वसत्वसुखावहे ॥
ज्यैष्ठे यात्रां नरः कृत्वा[१] नारी वा संयतेन्द्रिया ।
यथोक्तेन विधानेन दशम्याञ्च[२] समाहितः ॥
प्रतिष्ठां कुरुते यस्तु शाठ्य-दम्भविवर्ज्जितः ।
स भुक्त्वा विविधान् भोगान् मोक्षञ्च लभते ध्रुवम् ॥

ऋषय ऊचुः—

श्रोतुमिच्छामहे देव प्रतिष्ठां वदतस्तव ।
विधानं चार्च्चनं दानं फलं तत्र जगत्पतेः ॥

ब्रह्मोवाच—

शृणुध्वं मुनिशार्द्दूलाः प्रतिष्ठां विधिचोदिताम् ।
यां कृत्वा तु नरो भक्त्या नारी वा लभते ध्रुवम्[३] ॥
यात्रा द्वादशसम्पूर्णा यदा स्यात्तु द्विजोत्तमाः ।
तदा कुर्व्वीत विधिवत् प्रतिष्ठां पापनाशिनीम् ॥
ज्यैष्ठे मासि सिते पक्षे त्वेकादश्यां समाहितः ।
गत्वा जलाशयं पुण्यमाचम्य प्रयतः शुचिः ॥

---

(१) क ख पुस्तकद्वये—कुर्य्यात् ।
(२) घ पुस्तके दश द्वे च ।
(३) घ पुस्तके—फलम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः स्नानं प्रकुर्व्वीत विधिवत्सुसमाहितः ॥
यस्य यो विधिरुद्दिष्ट ऋषिभिः स्नानकर्म्मणि ।
तेनैव तु विधानेन स्नानं तस्य विधीयते ॥
स्नात्वा सम्यग्विधानेन ततो देवानृषीन् पितॄन् ।
सन्तर्पयेत्तथाऽन्यांश्च नामगोत्रविधानवित् ॥
उत्तीर्य्य वाससी धौते निर्म्मले परिधाय वै ।
उपस्पृश्य विधानेन भास्कराभिमुखस्ततः ॥
गायत्रीं पावनीं देवीं मनसा वेदमातरम् ।
सर्व्वपापहरां पुण्यां जप्त्वा चाष्टोत्तरं शतम् ॥
पुण्यांश्च सौरमन्त्रांश्च श्रद्धया सुसमाहितः ।
त्रिः प्रदक्षिणमावृत्य भास्करं प्रणमेत्ततः ॥
वेदोक्तं त्रिषु वर्णेषु स्नानं जप्यमुदाहृतम् ।
स्त्री-शूद्रयोः स्नानमेवं[1] वेदोक्तविधिवर्ज्जितम् ॥
ततो गच्छेद्गृहं मौनी पूजयेत् पुरुषोत्तमम् ।
प्रक्षाल्य हस्तौ पादौ च उपस्पृश्य यथाविधि ॥
घृतेन स्नापयेद्देवं क्षीरेण तदनन्तरम् ।
मधु-गन्धोदकेनैव तीर्थचन्दनवारिणा ॥
ततो वस्त्रयुगं श्रेष्ठं भक्त्या तं परिधापयेत् ।
पूजयेत्परया भक्त्या पद्मैश्च[2] पुरुषोत्तमम् ।
अन्यैश्च वैष्णवैः पुष्पैरर्च्चयेन्मल्लिकादिभिः ॥

---

(१) मूले—स्नानजाप्यम् ।
(२) क ग पुस्तकद्वये—पुष्पैश्च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्पूज्यैवं जगन्नाथं भुक्ति मुक्तिप्रदं हरिम् ।
धूपञ्चागुरुसंयुक्तं दद्द्देवस्य[1] चाग्रतः ॥
गुग्गुलं च मुनिश्रेष्ठा दद्द्घृतसमन्वितम् ।
दीपं प्रज्वालयेद्भक्त्या यथाशक्त्या घृतेन वै ॥
अन्यांश्च दीपकान् दद्याद्द्वादशैव समाहितः ।
घृतेन च मुनिश्रेष्ठास्तिलतैलेन वा पुनः ॥
नैवेद्ये पायसाऽपूप-शष्कुली-वटकं तथा ।
मोदकं फाणितं चान्यफलानि च निवेदयेत् ॥
एवं पञ्चोपचारेण सम्पूज्य पुरुषोत्तमम् ।
ॐ—नमः पुरुषोत्तमायेति जपेदष्टोत्तरं शतम् ॥
ततः प्रसादयेद्देवं भक्त्या तं पुरुषोत्तमम् ।
नमस्ते सर्व्वलोकेश भक्तानामभयप्रद ! ॥
संसारसागरे मग्नं त्राहि मां पुरुषोत्तम ! ।
यास्ते मया कृता यात्रा द्वादशैव जगत्पते ! ॥
प्रसादात्तव गोविन्द सम्पूर्णास्ता भवन्तु मे ।
एवं प्रसाद्य तं देवं दण्डवत् प्रणिपत्य च ॥
ततोऽर्च्चयेद्गुरुं भक्त्या पुष्पवस्त्रानुलेपनैः ।
नानयोरन्तरं यस्माद्विद्यते मुनिसत्तमाः ॥
देवस्योपरि कुर्व्वीत श्रद्धया सुसमाहितः ।
नानापुष्पैर्मुनिश्रेष्ठा विचित्रं पुष्पमण्डलम्[2] ॥

---

(१) ग पुस्तके—देवदेवस्य ।
(२) घ पुस्तके—मण्डपम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्वाऽवधारणं पश्चात् जागरं कारयेन्निशि ।
कथाञ्च वासुदेवस्य तद्गीतिञ्चापि कारयेत् ॥
ध्यायन् पठन्[1] स्तुवन् देवं गमये[2]द्रजनीं बुधः ॥
ततः प्रभाते विमले द्वादश्यां द्वादशैव तु ।
निमन्त्रयेत् कृतस्नानान् ब्राह्मणान् वेदपारगान् ॥
इतिहास-पुराणज्ञान् श्रोत्रियान् संयतेन्द्रियान् ।
स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः ॥
स्नापयेत् पूर्व्ववद्भक्त्या तत्रस्थं पुरुषोत्तमम् ।
गन्धैः पुष्पैरुपहारैर्नैवेद्यैर्दीपकैस्तथा ॥
उपहारैर्बहुविधैः प्रणिपातैः प्रदक्षिणैः ।
जप्य[3]-स्तुति-नमस्कारैर्गीतवाद्यैर्मनोहरैः ॥
सम्पूज्यैवं जगन्नाथं ब्राह्मणान् पूजयेत्ततः ।
द्वादशैव तु गास्तेभ्यो दत्त्वा कनकमेव च ॥
छत्रोपानद्युगञ्चैव श्रद्धाभक्तिपुरःसरः[4] ।
भक्त्या तु सधनं तेभ्यो दद्याद्वस्त्रादिकं द्विजाः ॥
सद्भावेन तु गोविन्दस्तु(स्तो)ष्यते पूजितो यतः ।
आचार्य्याय ततो दद्याद् गां वस्त्रं कनकं तथा ॥
छत्रोपानद्युगञ्चापि कांस्यपात्रञ्च भक्तितः ।
ततस्तान् भोजयेद्विप्रान् भोज्यं पायसपूर्व्वकम् ॥

(१) ग पुस्तके—गायन् ।
(२) क-ख पुस्तकद्वये—प्रणयेत् ।
(३) घ पुस्तके—जाप्यैः ।
(४) ख पुस्तके—समन्वितः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पक्वान्नं भच्य-भोज्यञ्च सगुड़ं शर्कराऽन्वितम् ।
ततस्तानन्नतृप्तांश्च ब्राह्मणान् स्वस्थमानसान् ॥
द्वादशैवोदकुम्भांश्च दद्याद्भक्त्या समोदकान् ।
दक्षिणाञ्च यथाशक्त्या दद्यात्तेभ्यो विमत्सरः ॥
कुम्भञ्च दक्षिणाञ्चैव आचार्य्याय निवेदयेत् ।
एवं सम्पूज्य तान् विप्रान् गुरुं ज्ञानप्रदायकम् ॥
पूजयेत् परया भक्त्या विष्णुतुल्यं द्विजोत्तमाः ।
सुवर्ण-वस्त्र-गो-धान्यैर्द्रव्यैश्चान्यैर्व्वरं बुधः ॥
सम्पूज्य तं नमस्कृत्य इमं मन्त्रमुदीरयेत् ।
सर्व्वव्यापी जगन्नाथः शङ्खचक्रगदाधरः ॥
अनादिनिधनो देवः प्रीयतां परमेश्वरः ।
इत्युच्चार्य्य ततो विप्रांस्त्रिः कृत्वा च प्रदक्षिणम् ।
प्रणम्य शिरसा भक्त्या आचार्य्यन्तु विसर्ज्जयेत् ॥
ततस्तान् ब्राह्मणान् भक्त्या चाऽऽसीमान्तमनुव्रजेत् ।
अनुव्रज्य च तान् सर्व्वान् नमस्कृत्य निवेदयेत् ॥
बान्धवैः स्वजनैर्युक्तस्ततो भुञ्जीत वाग्यतः ।
'अन्यैश्चोपार्ज्जितैर्[२]दीनैर्भिक्षुकैश्चार्थकाङ्क्षिभिः ॥
एवं कृत्वा नरः सम्यङ्नारी वा लभते फलम् ।
अश्वमेधसहस्राणां राजसूयशतस्य च ॥
अतीतं शतमादाय पुरुषाणां नरोत्तमः ।

---

(१) मूले—अन्नैश्च तर्पयेद्दीनान् भिक्षुकांश्चान्नकाङ्क्षिणः ।
(२) ग पुस्तके—अन्यैश्चोपासकैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भविष्यञ्च शतं विप्राः स्वकुल्यान्[1] दिव्यरूपधृक् ।
सर्व्वलक्षणसम्पन्नः सर्व्वालङ्कारभूषितः ॥
सर्व्वकामसमृद्धात्मा देववद्विगतज्वरः ।
रूपयौवनसम्पन्नो गुणैः सर्व्वैरलङ्कृतः ॥
स्तूयमानोऽप्सरोभिश्च गन्धर्व्वैः समलङ्कृतः ।
विमानेनार्कवर्णेन कामगेन स्थिरेण च ॥
पताका-ध्वजयुक्तेन सर्व्वरत्नैरलङ्कृतः ।
उद्योतयन् दिशः सर्व्वाश्चाकाशे विगतक्लमः ॥
युवा महाबलो धीमान् विष्णुलोकं स गच्छति ।
तत्र कल्पशतं यावत् भुक्त्वा भोगान् यथेप्सितान् ॥
गन्धर्व्वाप्सरसैः सिद्धैः सुर-विद्याधरोरगैः ।
स्तूयमानो मुनिवरैस्तिष्ठति विगतज्वरः ॥
यथा देवो जगन्नाथः शङ्ख-चक्र-गदाधरः ।
तथाऽसौ मुदितो विप्राः कृत्वा रूपं चतुर्भुजम् ॥
भुक्त्वा तत्र वरान् भोगान् क्रीड़ित्वा चाप्सरैः सह ।
तदन्ते ब्रह्मसदनमायाति सर्व्वकामदम् ॥
सिद्ध-विद्याधरैश्चापि शोभितं सुर-किन्नरैः ।
कालं नवतिकल्पन्तु तत्र भुक्त्वा सुखं नरः ॥
तस्मादायाति विप्रेन्द्राः सर्व्वकामफलप्रदम् ।
रुद्रलोकं सुरगणैः सेवितं [2]सौख्य-मोक्षदम् ॥

(१) घ पुस्तके—स्वर्गत्या ।
(२) ग पुस्तके—सुख—।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनेकशतसाहस्रैर्विमानैः समलङ्कृतम् ।
सिद्ध-विद्याधरैर्यक्षैर्भूषितं दैत्यदानवैः ॥
अशीतिकल्पकालन्तु तत्र भुक्त्वा सुखं नरः ।
तदन्ते याति गोलोकं सर्व्वभोगसमन्वितम् ॥
सुरसिद्धाप्सरोभिश्च शोभितं सुमनोहरम् ।
तत्र सप्ततिकल्पांस्तु भुक्त्वा भोगमनुत्तमम् ॥
दुर्लभं त्रिषु लोकेषु स्वस्थचित्तो जितेन्द्रियः ।
तस्मादागच्छते लोकं प्राजापत्यमनुत्तमम् ॥
गन्धर्व्वाप्सरसैः सिद्धैर्मुनिविद्याधरैर्वृतः ।
षष्ठिकल्पं सुखं तत्र भुक्त्वा नानाविधं मुदा ॥
तदन्ते शक्रभवनं नानाश्चर्य्यसमन्वितम् ।
गन्धर्व्वैः किन्नरैः सिद्धैः सुर-विद्याधरोरगैः ॥
गुह्यकाऽप्सरसैः साध्यैर्वृतश्चान्यैर्दिवौकसैः ।
आगत्य तत्र पञ्चाशत्कल्पान् भुक्त्वा सुखं नरः ॥
सुरलोकं ततो गत्वा विमानैः समलङ्कृतः ।
दुर्लभं पावनं धीमान् देवैः सर्व्वैः समन्वितः ॥
तदन्ते योगिनां लोकं गत्वा मोक्षप्रदं शिवम् ।
तत्र चत्वारिंशत्कल्पं भुक्त्वा भोगान् सुदुर्लभान् ॥
गच्छति तु ततो लोकं नक्षत्राख्यं सुदुर्लभम् ।
ततो भोगान् वरान् भुङ्क्ते त्रिंशत्कल्पान् यथेप्सितान् ।
तस्मादागच्छते लोकं शशाङ्कस्य द्विजोत्तमाः ।
यत्राऽसौ तिष्ठते सोमः सर्व्वैर्देवैरलङ्कृतः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र विंशतिकल्पन्तु भुङ्क्ते भोगं सुदुर्लभम् ।
आदित्यस्य ततो लोकमायाति सुरपूजितम् ॥
नानाश्चर्य्यमयं पुण्यं गन्धर्व्वाप्सरःसेवितम् ।
तत्र भुक्त्वा शुभान् भोगान् दशकल्पान् द्विजोत्तमाः ॥
तस्मादायाति भुवनं गन्धर्व्वाणां सुदुर्लभम् ।
तत्र भोगान् समस्तांश्च कल्पमेकं यथासुखम् ॥
भुक्त्वा चाऽऽयाति मेदिन्यां राजा भवति धार्म्मिकः ।
चक्रवर्त्ती महावीर्य्यो गुणैः सर्व्वैरलङ्कृतः ॥
कृत्वा राज्यं स्वधर्म्मेण यज्ञैरिष्ट्वा सुदक्षिणैः ।
तदन्ते योगिनां लोकं गत्वा मोक्षप्रदं शिवम् ॥
तत्र भुक्त्वा परान् भोगान् यावदाहूतसंप्लवम् ।
तस्मादागच्छते चाऽत्र जायते योगिनां कुले ॥
प्रवरे वैष्णवे विप्रा दुर्लभे साधुसम्मते ।
चतुर्व्वेदी विप्रवरो यज्ञैरिष्ट्वाऽप्तदक्षिणैः ॥
वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् ।

विष्णुलोकनिर्व्वचनावसरे के तत्र यान्तीति जिज्ञासायामाह प्रजापतिः—

वटराजसमीपे तु दक्षिस्योदधेस्तटे ।
दृष्टो यैर्भगवान् कृष्णः पुष्कराक्षो जगत्पतिः ।
क्रीड़न्त्यप्सरसैः सार्द्धं यावद्द्यौश्चन्द्रतारकम् ॥
प्रतप्तहेमसङ्काशा जरामरणवर्ज्जिताः ।
सर्व्वदुःखविहीनाश्च तृष्णा-ग्लानिविवर्ज्जिताः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्भुजा महावीर्य्या वनमालाविभूषिताः ।
श्रीवत्सोरसि[1] संयुक्ताः शङ्खचक्रगदाधराः ॥
केचिन्नीलोत्पलश्यामाः केचित्काञ्चनसन्निभाः ।
श्यामवर्णाः कुण्डलिनस्तथान्ये वज्रसन्निभाः ॥
विचरन्ति पुरे दिव्ये रूप-यौवनगर्व्विताः ।
कृष्णं रामं सुभद्राञ्च पश्यन्ति पुरुषोत्तमे ॥
विष्णुलोकात्परं लोकं नाऽत्र पश्यामि भो द्विजाः ।
ये लोकाः स्वर्गलोके तु श्रूयन्ते पुण्यकर्म्मणाम् ॥
विष्णुलोकस्य ते लोकाः कलां नार्हन्ति षोड़शीम् ।
न तत्र नास्तिका यान्ति पुरुषा विषयात्मकाः ॥
कृतघ्ना नापि पिशुना न स्तेना नाजितेन्द्रियाः ।
येऽर्च्चयन्ति सदा भक्त्या वासुदेवं जगद्गुरुम् ॥
ते तत्र वैष्णवा यान्ति विष्णुलोकं न संशयः ।
दक्षिणस्योदधेस्तीरे क्षेत्रे परमदुर्लभे ॥
कल्पवृक्षसमीपे तु ये त्यजन्ति कलेवरम् ।
तेऽपि तत्र नरा यान्ति ये मृताः पुरुषोत्तमे ॥

अथैतत्प्रयोगः—

ज्यैष्ठे द्वादशयात्राः कृत्वा तत्प्रतिष्ठां सङ्कल्प्य कुर्य्यात् ।

ॐ अद्य ज्यैष्ठशुक्लैकादश्यां बह्वश्वमेधसहस्र-राजसूयशतजन्य-फल-समफलप्राप्त्यतीतशताऽनागतपञ्चाशत्स्वकुल्यपुरुष-सहित-दिव्य-

---

(१) घ पुस्तके—श्रीवत्सलाञ्छनैर्युक्ताः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपष्टक् सर्व्वलक्षणसम्पन्न-सर्व्वालङ्कारभूषित-सर्व्वकामसमृद्ध-देव-वह्निगतज्वर-सर्व्वगुणालङ्कृतबह्वप्सरोगन्धर्व्वैस्तूयमान-सर्व्वरत्नालङ्कृत-विगतक्लमयुवमहाबलवीर्य्यवदात्मीयसर्व्वदिगुद्योतन-समकालिका-र्कवर्णकामग स्थिरपताकाध्वजयुक्तविमानकरणक[[१]विष्णुलोकगमन-तदधिकरणक—बहुगन्धर्व्वाप्सरःसिद्धसुरविद्याधरोरगमुनिवरस्तूय-मान-शङ्ख-चक्र-गदाधरचतुर्भुज-मुदित—विगतज्वरात्मकर्त्तृक-कल्प-शतावच्छिन्नयथेप्सितबहुभोगोपभोग--बह्वप्सरःक्रीड़न—तदुत्तरसर्व्व-कामग—बहुसिद्ध-विद्याधर-सुर—किन्नरोपशोभित-ब्रह्मसदनगमन-तदधिकरणकनवतिकल्पावच्छिन्न—सुखभोग-तदुत्तरसर्व्वकामफल-प्रवाह—सुरगणसेवितसौख्यमोच्चलाभैकशतसहस्रविमानभूषितबहु-सित-वपुः-सिद्ध विद्याधर-यक्ष-दैत्य-दानवसमलङ्कृतरुद्रलोकगमन-तदधिकरणकाऽशीतिकल्पावच्छिन्न-सुखभोग-तदुत्तरसर्व्वभोगसम-न्वित-बहुसुर—सिद्धाप्सरःसेवित सुमनोहरगोलोकगमन-तदधिकर-णक--सप्ततिकल्पावच्छिन्नानुक्तत्रिलोकीदुर्लभबहुभोगोपभोग—तदु-त्तराऽनुत्तमबहुगन्धर्व्वाप्सरः-सिद्ध-मुनि-विद्याधरवृत-प्रजापतिलोक-गमन—तदधिकरणकमुदितात्मकर्त्तृकषष्टिकल्पावच्छिन्ननानाश्चर्य्य-समन्वितबहुगन्धर्व्वकिन्नर--सिद्ध—सुर-विद्याधरोरग—गुह्यकाप्सरो-दिवौकोवृतशक्रभवनगमन—तदधिकरणपञ्चाशत्कल्पावच्छिन्नसुख-भोग—तदुत्तरबहुविमानसमलङ्कृतदुर्लभपावन-सर्व्वदेवालङ्कृतसुर-लोकाधिकरणकश्रीमत्स्वकर्त्तृक-चत्वारिंशत्कल्पावच्छिन्नदुर्लभबहु-भोगोपभोग--तदुत्तरसुदुर्लभनक्षत्रलोकगमन-तदधिकरणकत्रिंशत्-

(१) ख पुस्तके [ ] चिह्नितांशः पतितः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कल्पावच्छिन्नयथेप्सितवरबहुभोगोपभोग-तदुत्तरशशाङ्कलोकगमन-तदधिकरणकविंशतिकल्पावच्छिन्न-बहुशुभभोगोपभोग-तदुत्तरसुर-पूजितनानाश्चर्य्यमयपुण्यगन्धर्व्वाप्सरःसेविताऽऽ]दित्यलोकगमन-तद-धिकरणकदशकल्पावच्छिन्न-बहुशुभभोगोपभोग-तदुत्तर-सुदुर्लभ-गन्धर्व्वलोकगमन-तदधिकरणैककल्पावच्छिन्न-समस्तभोगोपभोग-तदुत्तरमेदिन्यधिकरणक-परमधार्म्मिकमहावीर्य्य-सर्व्वगुणालङ्कृत-चक्रवर्त्तित्वप्राप्ति-सदक्षिणबहुयज्ञकरण-तदुत्तरमोक्षप्रद-योगिलोक-गमन-तदधिकरणकयावदाहूतसंप्लववरबहुभोगोपभोग-तदुत्तर-वैष्णवदुर्लभसाधुसम्मतयोगिकुलाधिकरणकचतुर्व्वेदि-विप्रवर-स्व-जन्मतदुत्तरसदक्षिण-बहुयज्ञकरण-तदुत्तरवैष्णवयोगप्राप्तिपूर्व्वक-मोक्षावाप्तिकामः कृतयात्राद्वादशप्रतिष्ठामहं करिष्ये।

इति सङ्कल्प्य जलाशयं गत्वा प्रविश्य तत्र—तीर्थानि आग-च्छन्तु इत्यावाह्य नारायणं ध्यात्वा स्वसूत्रोक्तविधिना स्नात्वा तर्पणं कृत्वा—उत्तीर्य्य धौते वाससी परिधायाऽऽचम्य भास्कराभिमुखो-ऽष्टोत्तरशतं गायत्रीं जपित्वा ततः सौरमन्त्रानपि यथाज्ञानं जपित्वा त्रिः प्रदक्षिणीकृत्यादित्यं प्रणम्य मौनेनायतनं गत्वा पुरुषोत्तमं पूजयेत्।

तद्यथा—

आदावष्टोत्तरशतपलमितेन गव्यघृतेन ततो मधुना, गन्धोद-केन, ततस्तीर्थोदकेन ततश्चन्दनोदकेन, तुष्णीं पुरुषोत्तमं स्नापयेत्।

ततः श्रेष्ठं वासोयुगं भक्त्या परिधापयेत्। ततो गन्धेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मल्लिकादिपुष्पैश्च पूजयेत् ॥ ततोऽगुरुधूपं, गुग्गुलधूपं वा दद्यात्, घृतदीपं दद्यात्।

ततोऽन्यानपि द्वादशदीपान् घृतेन तैलेन वा दद्यात्।

नैवेद्यञ्च—पायसापूप-शष्कुली-वटक-मोदक-फाणित-फलानि दद्यात्।

फाणितं गुड़विकारः, शालुकाकारो लोष्ट्रभूतः खण्डो वा। ततः—ॐ "नमः पुरुषोत्तमाय" इति मन्त्रमष्टोत्तरशतं जपेत्।

ततः—

ॐ नमस्ते सर्व्वलोकेश भक्तानामभयप्रद।
संसारसागरे मग्नं त्राहि मां पुरुषोत्तम ॥
यास्ते मया कृता यात्रा द्वादशैव जगत्पते।
प्रसादात्तव गोविन्द सम्पूर्णास्ता भवन्तु मे ॥

इति पठित्वा प्रसादयेत्। ततो दण्डवत् प्रणिपतेत्। ततो गुरुं विष्णुवदर्च्चयेत्। ततः पुरुषोत्तमोपरि पुष्पमण्डपं कुर्य्यात्।

ततो रात्रौ वासुदेवस्य कथाभिर्गीतिभिश्च जागरणं कुर्य्यात्। विष्णुं ध्यायन् स्तुवन् नमस्यंश्च रात्रिं नयेत्।

ततः प्रभाते वेदपारगान् संयतेन्द्रियान् पौराणिकान् द्वादश ब्राह्मणान् निमन्त्रयेत्। ततः पूर्व्ववत् स्नानादि कृत्वा पुरुषोत्तमं स्नापयित्वा पूर्व्ववद्दण्डवत्प्रणामान्तां पूजां विधाय ब्राह्मणेभ्यो द्वादशवासोयुगानि हिरण्यखण्डानि छत्राणि उपानद्युगलञ्च श्रद्धया दद्यात्।

ततो गुरवे गां वस्त्रं हिरण्यं छत्रम्, उपानहौ कांस्यपात्रञ्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दद्यात्। ततो निमन्त्रितब्राह्मणान् भोज्यं, पायसं, पक्वान्नं भक्ष्यं गुड़ञ्च भोजयेत्॥

ततो मोदकसहितान् द्वादश कुम्भान् तेभ्यो दद्यात्। यथाशक्ति दक्षिणाञ्च दद्यात्।

ततो गुरवे स-मोदकमेकमुदककुम्भं हिरण्यं दक्षिणां च दद्यात्। ततः सुवर्ण-वस्त्र-गो-धान्यैरन्यैश्च श्रेष्ठद्रव्यैर्गुरुं सम्पूज्य नमस्कृत्य—

ॐ सर्व्वव्यापी जगन्नाथः शङ्ख-चक्र-गदाधरः।
अनादिनिधनो देवः प्रीयतां परमेश्वरः॥

इत्युच्चार्य्य त्रयोदशाऽपि ब्राह्मणान् त्रिः प्रदक्षिणीकृत्य गुरुप्राधान्येन विसर्ज्जयेत्। आसीमान्तमनुव्रज्य पुनः सर्व्वान् नमस्कृत्य गृहमागत्य सबान्धवो मौनेन भुञ्जीतेति॥

तथा,—

एवञ्च यस्यां कस्यामपि तिथौ—

ॐ अद्य यावद्द्युचन्द्रतारक-बह्वसरःसहक्रीड़न-जरामरण-सर्व्वदुःख--तृष्णा-ग्लानिविवर्ज्जितचतुर्भुजमहावीर्य्यवनमालाविभूषित-श्रीवत्सोरस्कसंयुक्त-शङ्ख-चक्र-गदाधररूपयौवनगर्व्वितात्मीय-यावदाहूतसंप्लवविष्णुपुरविचरणकामः कृष्ण-राम-सुभद्रादर्शनमहं करिष्ये।

इति सङ्कल्प्य पश्येत्॥

येऽर्च्चयन्ति सदा भक्त्या वासुदेवं जगद्गुरुम्।
ते तत्र वैष्णवा यान्ति विष्णुलोकं न संशयः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणस्योदधेस्तीरे क्षेत्रे परमदुर्लभे ।
दृष्ट्वा कृष्णञ्च रामञ्च सुभद्राञ्चापि यान्ति तत् ॥

नित्यविष्णुपूजायाम्—

तथा कदाचित् पुरुषोत्तमादिदर्शने विष्णुलोकगमनं फलमित्यर्थः ।

तथा—तत्रैव

संवत्सरमुपासित्वा माससमात्रमथापि वा ।
तेन चेष्टं हुतं तेन तेन तप्तं तपो महत् ॥
स याति परमं स्थानं यत्र योगेश्वरो हरिः ।
भुक्त्वा भोगान् विचित्रांश्च देवयोषित्समन्वितान् ॥
कल्पान्ते पुनरागत्य मर्त्यलोके नरोत्तमः ।
जायते योगिनां विप्रा ज्ञानज्ञेयोद्यतो गृहे ॥
सम्प्राप्य वैष्णवं योगं हरेः स्वच्छन्दतां व्रजेत् ।

तथा विष्णुलोकं प्रक्रम्य—

कल्पवृक्षसमीपे तु ये त्यजन्ति कलेवरम् ।
ते तत्र मनुजा यान्ति ये मृताः पुरुषोत्तमे ॥
वटसागरयोर्मध्ये यः स्मरन् पुरुषोत्तमम् ।
मृतः सोऽपि नरो याति तत्र नास्त्यत्र संशयः ॥
पुरमध्ये पुनर्भाति मन्दिरं रत्नभूषितम् ।

इत्युपक्रम्य—

तत्र ते पुरुषा यान्ति ये मृताः पुरुषोत्तमे ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षेत्रञ्च दुर्लभं लोके कीर्त्तितं पुरुषोत्तमम् ।
त्यक्त्वा यत्र नरा देहं यान्ति सालोक्यतां हरेः ॥
कृमिकीटपतङ्गाश्च तिर्य्यग्योनिगताश्च ये ।
तत्र देहं परित्यज्य तेऽपि यान्ति परां गतिम् ॥
पथि श्मशाने गृहमण्डपे वा रथ्याप्रदेशेष्वपि यत्र तत्र ।
इच्छन्ननिच्छन्नपि तत्र देहं सन्त्यज्य मोक्षं लभते मनुष्यः ॥
देहं त्यजन्ति पुरुषा ये तत्र पुरुषोत्तमे ।
कल्पवृक्षं समासाद्य मुक्तास्ते नाऽत्र संशयः ॥
वट-सागरयोर्मध्ये ये त्यजन्ति कलेवरम् ।
ते दुर्लभं परं मोक्षं प्राप्नुवन्ति न संशयः ॥

इति पुरुषोत्तमविधिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ कृत्तिवासाः ।

तथाहि—ब्रह्मपुराणे—

तथा चैवोत्कलदेशे कृत्तिवासा महेश्वरः ।
सर्व्वपापहरं तस्य क्षेत्रं परमदुर्ल्लभम् ॥
लिङ्गकोटीसमायुक्तं वाराणस्याः समं शुभम् ।
एकाम्रकेति विख्यातं तीर्थाष्टकसमन्वितम् ॥
तीर्थं विन्दुसरो नाम तस्मिन् क्षेत्रे द्विजोत्तमाः ।
देवानृषीन् मनुष्यांश्च पितॄन् सन्तर्प्य यत्नतः ॥
तिलोदकेन विधिना नाम-गोत्रविधानवित् ।
स्नात्वैवं विधिवत्तत्र सोऽश्वमेधफलं लभेत् ॥
ग्रहोपरागे संक्रान्त्यामयने विषुवे तथा ।
युगादौ षड़शीत्याञ्च तथाऽन्यत्र शुभे तिथौ ॥
ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति धनादिकम् ।
अन्यतीर्थाच्छतगुणं फलं ते प्राप्नुवन्ति वै ॥
पिण्डं ये संप्रयच्छन्ति पितृभ्यः सरसस्तटे ।
पितॄणामक्षयां तृप्तिं ते कुर्व्वन्ति न संशयः ॥
ततः शम्भोर्गृहं गच्छेत् वाग्यतः संयतेन्द्रियः ।
प्रविश्य पूजयेत् पूर्व्वं कृत्वा तत्र प्रदक्षिणम् ॥
घृतक्षीरादिभिः स्नानं कारयित्वा भवं शुचिः ।
चन्दनेन सुगन्धेन विलिप्य कुङ्कुमेन च ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र सम्पूजयेद्देवं चन्द्रमौलिमुमापतिम् ।
पुष्पैर्नानाविधैर्मेध्यैर्व्विल्वार्क-[1]कमलादिभिः ॥
आगमोक्तेन मन्त्रेण वेदोक्तेन च शङ्करम् ॥
अदीक्षितश्च नाम्नैव[2] मूलमन्त्रेण चार्च्चयेत् ।
एवं सम्पूज्य तं देवं गन्धपुष्पाऽम्बरादिभिः ॥
धूपैर्द्दीपैश्च नैवेद्यैरुपहारैस्तथा स्तवैः ।
दण्डवत् प्रणिपातैश्च गीतैर्वाद्यैर्मनोहरैः ॥
नृत्यैर्जप-नमस्कारैर्जयशब्दैः प्रदक्षिणैः ।
एवं सम्पूज्य विधिवद्देवदेवमुमापतिम् ॥
सर्व्वपापविनिर्म्मुक्तो रूपयौवनगर्व्वितः ।
कुलैकविंशमुद्धृत्य दिव्याभरणभूषितः ॥
सौवर्णेन विमानेन किङ्किणीजालमालिना ।
उपगीयमानो गन्धर्व्वैरप्सरोभिरलङ्कृतः ॥
उद्द्योतयन् दिशः सर्व्वाः शिवलोकं स गच्छति ।
भुक्त्वा तत्र सुखं दिव्यं मनसः प्रीतिदायकम् ॥
तल्लोकवासिभिः सार्द्धं यावदाहूतसंप्लवम् ।
ततस्तस्मादिहायातः पृथिव्यां पुण्यसङ्क्षये[3] ॥
जायते योगिनां गेहे चतुर्व्वेदी द्विजोत्तमः ।
योगं पाशुपतं प्राप्य ततो मोक्षमवाप्नुयात् ॥

---

(१) घ पुस्तके—पुन्नाग— ।

(२) क पुस्तके—नत्वैव ।

(३) घ पुस्तके—युगसंक्षये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शयनोत्थापने चैव संक्रान्त्यामयने तथा।
अशोकाख्यायाञ्चाष्टम्यां[1] पवित्रारोपणे तथा॥
ये च पश्यन्ति देवेशं कृत्तिवाससमव्ययम्।
विमानेनार्कवर्णेन शिवलोकं व्रजन्ति ते॥
सर्व्वकालेऽपि तं देवं ये पश्यन्ति सुमेधसः।
तेऽपि पापविनिर्म्मुक्ताः शिवलोकं व्रजन्ति वै॥
देवस्य पश्चिमे पूर्व्वे दक्षिणे चोत्तरे तथा।
योजनद्वितयं सार्द्धं क्षेत्रं तद्भुक्ति-मुक्तिदम्॥
तस्मिन् क्षेत्रवरे रम्ये[2] भास्करेश्वरसंज्ञितम्।
पश्यन्ति ये तु तं देवं स्नात्वा कुण्डे महेश्वरम्॥
आदित्येनार्च्चितं पूर्व्वं देवदेवं त्रिलोचनम्।
सर्व्वपापविनिर्म्मुक्ता विमानवरमास्थिताः॥
उपगीयमाना गन्धर्व्वैः शिवलोकं व्रजन्ति ते।
भुक्त्वा तत्र वरान् भोगान् यावदाहूतसंप्लवम्॥
पुण्यक्षयादिहायाता धार्म्मिकाश्च भवन्ति वै[3]।
यज्वानो दानशीलाश्च पृथिव्याः पतयस्तथा॥
मुक्तेश्वरञ्च सिद्धेशं स्वर्णजालेश्वरं तथा।
परमेश्वरञ्च विख्यातं श्मशाणमतिकेश्वरम्।
ये पश्यन्त्यर्च्चयित्वा च स्नात्वा विन्दुसरोऽम्भसि॥

---

(१) घ पुस्तके—अशोकाख्यामथाष्टम्याम्।

(२) ग पुस्तके—लिङ्गम्।

(३) मूले—जायन्ते प्रवरे कुले।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वपापविनिर्म्मुक्ता विमानवरमास्थिताः।
उपगीयमाना गन्धर्व्वैः शिवलोकं व्रजन्ति वै॥
तिष्ठन्ति तत्र मुदिताः कल्पमेकं द्विजोत्तमाः।
भुक्त्वा तु विपुलान् भोगान् शिवलोके मनोरमान्॥
पुण्यक्षयादिहायाता जायन्ते प्रवरे कुले।
अथवा योगिनां गेहे वेदवेदाङ्गपारगाः॥
उत्पद्यन्ते द्विजवराः सर्व्वभूतहिते रताः।
मोक्षशास्त्रार्थकुशलाः सर्व्वत्र समबुद्धयः॥
योगं शम्भोर्वरं प्राप्य ततो मोक्षं व्रजन्ति ते।
तस्मिन् क्षेत्रवरे पुण्ये लिङ्गं यद्दृश्यते द्विजाः॥
पूज्याऽपूज्यञ्च सर्व्वत्र वने रथ्यान्तरेऽपि वा।
चतुष्पथे श्मशाने वा यत्र कुत्र च तिष्ठति॥
दृष्ट्वा तल्लिङ्गमव्यग्रः श्रद्धया सुसमाहितः।
स्नापयित्वा तु तं भक्त्या गन्धैः पुष्पैर्मनोहरैः॥
धूपैर्दीपैः सनैवेद्यैर्नमस्कारैः तथा स्तवैः।
दण्डवत्प्रणिपातैश्च नृत्यगीतादिभिस्तथा॥
सम्पूज्यैवं विधानेन शिवलोकं व्रजेन्नरः।
नारी वा द्विजशार्दूलाः सम्पूज्य(१) श्रद्धयाऽन्विताः।
पूर्व्वोक्तं फलमाप्नोति नाऽत्र कार्य्या विचारणा॥
कः शक्नोति गुणान् वक्तुं समग्रान् मुनिसत्तमाः।
तस्य क्षेत्रवरस्याऽथ ऋते देवान्महेश्वरात्॥

(१) ग पुस्तके—सततं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मिन् क्षेत्रवरे गत्वा सततं श्रद्धयान्वितः ।
माधवादिषु[1] मासेषु नरो यदि वाऽङ्गना ॥
प्राप्नोत्यभिमतान् भोगान् शिवलोकञ्च गच्छति ।
यस्तत्र तीर्थं विधिवत् करोति नियतेन्द्रियः ॥
कुलैकविंशमुद्धृत्य शिवलोकं स गच्छति ।
यस्मिंस्तस्मिंस्तिथौ विप्राः स्नात्वा विन्दुसरोऽम्भसि ॥
पश्येद्देवं विरूपाक्षं देवीञ्च वरदां शिवाम् ।
गणं चण्डं कार्त्तिकेयं गणेशं वृषभं तथा ॥
कल्पद्रुमञ्च सावित्रीं शिवलोकञ्च गच्छति ।
एकाम्रके शिवक्षेत्रे वाराणसीसमे शुभे ॥
स्नानं करोति यस्तत्र मोक्षं स लभते शुभम् ।

इति कृत्तिवासोविधिः ।

अथ कोणार्कः ।

तथाहि—

एतन्मया मुनिश्रेष्ठाः क्षेत्रं प्रोक्तं सुदुर्लभम् ।
कोणार्कस्योदधेस्तीरं भुक्ति-मुक्तिफलप्रदम् ॥
स्नात्वैव[2] सागरे दत्त्वा सूर्य्यायाऽर्घ्यं प्रणम्य च ।
नरो वा यदि वा नारी सर्व्वकामफलं लभेत् ॥

---

(१) घ पुस्तके—माघाद्यादिषु मासेषु ।

(२) ग पुस्तके—स्नात्वा वै ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः सूर्य्यालयं गच्छेत् पुष्पमादाय वाग्यतः[१]।
प्रविश्य पूजयेज्ज्ञानुं कुर्य्यात्तत्त्रिः प्रदक्षिणम् ॥
[२]तान्त्रिकैर्वैदिकैर्मन्त्रैर्भक्त्या कोणार्कमर्च्चयेत्।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैरपि ॥
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथाऽपरैः[३]।
एवं सम्पूज्य कोणार्कं सहस्रांशुं जगत्प्रभुम् ॥
दशानामश्वमेधानां फलं प्राप्नोति मानवः।
सर्व्वपापविनिर्म्मुक्तो युवा दिव्यवपुर्नरः ॥
सप्ताऽवरान् सप्तपरान् वंशानुद्धृत्य भो द्विजाः।
विमानेनार्कवर्णेन कामगेन सुवर्च्चसा ॥
उपगीयमानो गन्धर्व्वैः सूर्य्यलोकं स गच्छति।
भुक्त्वा तत्र वरान् भोगान् यावदाहूतसंप्लवम् ॥
पुण्यक्षयादिहाऽऽयातः प्रवरे योगिनां कुले।
चतुर्व्वेदी भवेद्विप्रः स्वधर्म्म-[४]निरतः शुचिः ॥
योगं दिवस्पतेः प्राप्य ततो मोक्षमवाप्नुयात् ॥
चैत्रे मासि सिते पक्षे यात्रां मदन-[५]भञ्जिकाम्।
यः करोति नरस्तत्र पूर्व्वोक्तं स फलं लभेत् ॥
अयनोत्थानयोर्भानोः संक्रान्त्यां विषुवेऽयने ॥

---

(१) ख पुस्तके—सत्वरः।

(२) मूले—पूजयेत् परया भक्त्या कोणार्कं मुनिसत्तमाः।

(३) क पुस्तके—स्तवैः।

(४) ग पुस्तके—सर्व्वधर्म्मरतः।

(५) घ पुस्तके—दमनभञ्जिकाम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वारे रवेस्तिथौ चैव सर्व्वकालेऽथवा द्विजाः ।
ये तत्र यात्रां कुर्व्वन्ति पुरुषाः संयतेन्द्रियाः ॥
विमानेनार्कवर्णेन सूर्य्यलोकं व्रजन्ति ते ।
यस्तत्र सवितुः क्षेत्रे प्राणांस्त्यजति मानवः ॥
स सूर्य्यलोकमास्थाय देववन्मोदते दिवि ।
पुनर्मानुषतां प्राप्य राजा भवति धार्म्मिकः ॥
योगं रवेः समासाद्य ततो मोक्षमवाप्नुयात् ।

कोणार्कक्षेत्रमधिकृत्य—

आस्ते तत्र महादेवः तीरे नद-नदीपतेः ।
रामेश्वर इति ख्यातः सर्व्वकामफलप्रदः ॥
'तत्रार्च्चयन्ति कामारिं स्नात्वा सम्यङ्महोदधौ ।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैर्वरैः ॥
प्रणिपातैस्तथा स्तोत्रैर्गीतैर्वाद्यैर्मनोहरैः ।
राजसूयफलं प्राप्य वाजिमेधफलं तथा ॥
प्राप्नुवन्ति महात्मानः संसिद्धिं परमां तथा ।
कामगेन विमानेन किङ्किणीजालमालिना ॥
उपगीयमाना गन्धर्व्वैः शिवलोकं व्रजन्ति ते ।
आहूतसंप्लवं यावद्भुक्त्वा भोगाननुत्तमान् ॥
पुण्यक्षयादिहागत्य चातुर्व्वेदा भवन्ति ते ।
शाङ्करं योगमासाद्य ततो मोक्षं व्रजन्ति ते ॥

इति कोणार्कविधिः ।

---

(५) ख पुस्तके—ये तं पश्यन्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ विरजक्षेत्रम्।

तथा ब्रह्मोवाच—

विरजे विरजा माता ब्रह्माणी सम्प्रतिष्ठिता।
यस्याः सन्दर्शने[1] मर्त्त्यः पुनात्यासप्तमं कुलम्॥
स्नात्वा दृष्ट्वा तु[2] तां देवीं भक्त्याऽऽपूज्य प्रणम्य च।
नरः स्ववंशमुद्धृत्य मम लोकं स गच्छति॥
अन्याश्च तत्र तिष्ठन्ति विरजे[3] लोकमातरः।
सर्व्वपापहरा देव्यो वरदा भक्तवत्सलाः॥
आस्ते वैतरणी तत्र सर्व्वपापहरा नदी।
यस्यां स्नात्वा नरश्रेष्ठः सर्व्वपापैः प्रमुच्यते॥
आस्ते स्वयम्भूस्तत्रैव क्रोड़रूपी हरिः स्वयम्।
दृष्ट्वा प्रणम्य तं भक्त्या नरो विष्णुपुरं व्रजेत्॥
[4]कपिलागोग्रहे सोमतीर्थे चालावुसंज्ञके।
मृत्युञ्जये क्रोड़तीर्थे [5]वसुसिद्धेश्वरे तथा॥
तीर्थेष्वेतेषु मतिमान् यत् फलं लभते नरः।
तत्फलं समवाप्नोति विरजे स्नानतर्पणात्॥

---

(१) घ पुस्तके—सन्दर्शनात्।

(२) क ख पुस्तके—स्नात्वादृष्ट्वा तु।

(३) घ पुस्तके—विरजाः।

(४) घ पुस्तके—कापिले।

(५) ख पुस्तके—वासुके चेश्वरे तथा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विरजे यो मम क्षेत्रे पिण्डदानं करोति वै ।
स करोत्यक्षयां तृप्तिं पितृणां नात्र संशयः ॥
मम क्षेत्रे मुनिश्रेष्ठा विरजे ये कलेवरम् ।
परित्यजन्ति पुरुषास्ते मोक्षं प्राप्नुवन्ति वै ॥

इति विरजक्षेत्रम् ।

अथ गङ्गासागरसमीपे कपिलदर्शनफलम् ॥

ब्रह्मपुराणे—

स्नात्वा यः सागरे मर्त्त्यः पवित्रे कपिलं हरिम् ।
पश्येद्देवीञ्च वाराहीं स याति त्रिदशालयम् ॥

अथ कृत्तिवासःक्षेत्रप्रयोगः ।

ॐ अद्याश्वमेधफलसमफलप्राप्तिकामो विन्दुसरसि स्नानमहं करिष्ये ।

इति सङ्कल्प्य तत्र सविधि स्नायात् ।

दाने च—

अन्यतीर्थदानाऽपेक्षयाऽत्र शतगुणं फलम् ।

अथ कृत्तिवासःपूजा ।

ॐ अद्य—एकविंशतिकुलोद्धरणपूर्व्वक-सर्व्वपापविनिर्म्मुक्त-रूप-यौवनगर्व्वित-दिव्याभरणभूषित-बहुगन्धर्व्वाप्सरःसमुपगीयमानाऽऽ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्मकर्तृकसर्व्वदिगुद्द्योतनसमकालिन किङ्किणीजालमालि-सौवर्ण-विमानकरणक--शिवलोकगमन--तदधिकरणक--यावदाहूतसंप्लव-तल्लोकवासि-बहुपुरुषसहितात्मीयदिव्यसुखभोग-तदुत्तरयोगिगृहो-त्पन्नचतुर्व्वेदि-द्विजोत्तमत्वभवन-तदुत्तर-पाशुपतयोगप्राप्तिपूर्व्वक-मोचावाप्तिकामो ब्रह्मपुराणोक्तविधिना कृत्तिवासःपूजामहं करिष्ये ।

इति सङ्कल्प्य देवं प्रदक्षिणीकृत्य पाद्यमाचमनीयञ्च दत्त्वा अष्टोत्तरपलशतमितेन गव्यघृतेन ततस्तावतैव गव्यदुग्धेन, ततो मधुना ततो गन्धोदकेन, ततस्तीर्थोदकेन, ततश्चन्दनोदकेन, स्नाप-यित्वा मधुपर्कं पुनराचमनीयञ्च दत्त्वा चन्दनानुलेपनं कुङ्कुमा-नुलेपनञ्च दत्त्वा अर्क-पद्मादिपुष्पैरागमोक्तमन्त्रेण तदज्ञाने तु "ॐ कृत्तिवाससे नमः" इति ॐ नमः शिवाय "इति" च त्रिः सम्पूज्य धूपं दीपं नैवेद्यमुपहारं वस्त्रञ्च दत्त्वा स्तवैर्दण्डवत्प्रणामै-र्गीतैर्वाद्यैर्नृत्येन जपेन नमस्कारेण जयशब्दैः प्रदक्षिणैरर्चयेदिति ।

शिवस्य शयने उत्थाने संक्रान्तौ, अशोकाष्टम्यां वा कृत्ति-वाससो दर्शने ॐ अद्य शिवशयनेऽर्कवर्णविमानकरणकशिवलोक-गमनकामः कृत्तिवासोदर्शनमहं करिष्ये ।

इति संङ्कल्प्य पश्येत् ।

एवं शिवोत्थानादावपि ।

कालान्तरे तु—ॐ अद्य शिवलोकगमनकामः कृत्तिवासो-दर्शनमहं करिष्ये ।

इति सङ्कल्प्य पश्येत् ।

२४

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतत् चेत्रस्थभास्करेश्वरदर्शने—

ॐ अद्य सर्व्वपापविनिर्म्मुक्त-विमानवरावस्थितबहुगन्धर्व्वोप-गीयमान × × शिवलोकगमन-तदधिकरणकाहूतसंप्लवपर्य्यन्त-बहुवरभोगोपभोग-तदुत्तरैतल्लौकिकधार्म्मिक-यज्ञदानशीलपृथिवी-पतित्वभवनकामः कुण्डस्नानपूर्व्वकभास्करेश्वरदर्शनमहं करिष्ये।

इति सङ्कल्प्य कुण्डे स्नात्वा तं पश्येत्।

मुक्तेश्वर-सिद्धेश-स्वर्णजालेश्वर-परमेश्वराणामन्यतमदर्शने—

ॐ अद्य सर्व्वपापविनिर्म्मुक्तविमानवरावस्थितबहुगन्धर्व्वोपगी-यमानात्मीयशिवलोकगमन—तदधिकरणकैककल्पावच्छिन्नविपुल-मनोरमबहुभोगोपभोग—तदुत्तरैतल्लौकिक—प्रवरयोगिकुल -योगि-गेहान्यतराधिकरणकवेदवेदाङ्गपारगसर्व्वभूतहितरतमोक्षशास्त्रा-र्थकुशल समबुद्धि[1]द्विजवरत्वभवन--तदुत्तरवरशम्भुयोगप्राप्तिपूर्व्वक मोक्षप्राप्तिकामो विन्दुसरोऽम्भसि स्नात्वा मुक्तेश्वरमर्च्चयित्वा तद्द-र्शनमहं करिष्ये।

इति सङ्कल्प्य विन्दुसरसि स्नात्वा मुक्तेश्वरमभ्यर्च्च्य पश्येत्। एवं सिद्धेशादावपि।

रथ्यास्थितलिङ्गान्तरपूजने तु—

ॐ अद्य शिवलोकगमनकामो ब्रह्मपुराणोक्तविधिना कृत्ति-वासःचेत्रस्थशिवलिङ्गपूजनमहं करिष्ये।

इति सङ्कल्प्य—

---

१ क पुस्तके—सर्व्वत्र समदृष्टि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लिङ्गं दृष्ट्वा श्रद्धयैकाग्रमनाः सुसमाहितः स्नपन-गन्ध-पुष्प मनोरमधूप-दीप नैवेद्य-नमस्कार-स्तव-दण्डप्रणाम-नृत्य-गीत-वाद्यैः पूजयेत्।

ततः क्षेत्रगमने तु—ॐ अद्याभिलषितबहुकामावाप्ति-शिव-लोकगमनकामः कृत्तिवासःक्षेत्रगमनमहं करिष्ये।

इति सङ्कल्प्य तत्र गच्छेत्।

अथ कोणार्कविधिः।

ॐ अद्याभिमतफलप्राप्तिकामः सागरस्नान-सूर्य्यार्घ्यदान-तत्-प्रणाममहं करिष्ये।

इति सङ्कल्प्य सागरे सविधितर्पणान्तं स्नानं कृत्वा सूर्य्यं प्रणमेत्।

ततः पुष्पमादाय मौनी कोणार्कमठं प्रविश्य—

ॐ अद्य दशाश्वमेधजन्यफलसमफलप्राप्ति-सप्तावरसप्तपरवंश्यो-द्धारपूर्व्वक सर्व्वपापविनिर्म्मुक्तवरदिव्यवपुर्वरबहुगन्धर्व्वोपगीयमाना-त्मीयार्कवर्णकामगसुवर्च्चोविमानकरणक--सूर्य्यलोकगमन-तदधि-करणकाहूतसंप्लवपर्य्यन्तवरबहुभोगोपभोग-तदुत्तरैतल्लौकिकप्रवर-योगिकुलाधिकरणकचतुर्व्वेदिस्वधर्म्मनिरतशुचिविप्रत्वभवन-तदुत्तर-दिवस्पतियोगप्राप्तिपूर्व्वकमोक्षावाप्तिकामो ब्रह्मपुराणोक्तविधिना कोणार्कपूजनमहं करिष्ये।

इति सङ्कल्प्य अर्कं त्रिः प्रदक्षिणीकृत्यागमिकैर्वैदिकैश्च मन्त्रै-र्गन्ध-पुष्प-धूप-दीप-नैवेद्य-दण्डप्रणाम-जयशब्दैरर्च्चयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथाऽत्रैव रामेश्वरविधिः--

ॐ अद्य राजसूयाश्वमेधफलसमफल परमसंसिद्धिप्राप्तिकामः-किङ्किणीजालमालिविमानकरणक-गन्धर्व्वोपगीयमानात्मकर्त्तृक-शिवलोकगमन-तदधिकरणकाहूतसंप्लवपर्य्यन्तमुत्तम-बहुभोगोपभोग तदुत्तरैहिकयजुर्व्वेदिविप्रत्वभवन-तदुत्तरशङ्करयोगप्राप्तिपूर्व्वक-मोक्षावाप्तिकामो ब्रह्मपुराणोक्तविधिना रामेश्वरपूजामहं करिष्ये ।

इति सङ्कल्प्य समुद्रे सविधि स्नात्वा कोणार्कवदेव रामेश्वरमर्च्चयेत् ।

अथ विरजाक्षेत्रप्रयोगः ।

ॐ अद्याऽऽसप्तकुलपवित्रीकरणकामो विरजादर्शनमहं करिष्ये ।

इति सङ्कल्प्य पश्येत् ।

अस्यास्तु स्नानपूर्व्वक-दर्शन-पूजा-प्रणामानां स्ववंशोद्धारपूर्व्वक-ब्रह्मलोकगमनं फलम् ॥

वैतरणीस्नाने सर्व्वपापविनिर्म्मुक्तिः फलम् ।

क्रोड़रूपि-विष्णुदर्शने विष्णुपुरगमनं फलम् ।

एवं वाराहीदर्शनेऽपीति ।

इति महामहोपाध्याय श्रीवाचस्पतिमिश्रविरचिते

तीर्थचिन्तामणौ द्वितीयः पुरुषोत्तमप्रकाशः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ गङ्गायै नमः।

जलक्रीड़ालोलत्रिदशतरुणीनागरमणी
नवश्रोणिश्रेणी-घनजघन-पीनस्तनभरैः।
त्रुटद्वीचीचञ्चत्कनककलहंसीकलरवैः
समाहूतब्रह्मश्रियमिव भजे देवसरितम्॥
मज्जद्देववधूटिकाकुचतटीसंघट्टसञ्चूर्णिता
गङ्गाया जलवीचयो मधुलिहां श्रेणीभिराचुम्बिताः।
चञ्चच्चञ्चलचक्रवाकतरुणीसंभ्रान्तनेत्राञ्चलै-
रापीता जगतां दिशन्तु सततं कल्याणमव्याहतम्॥

तत्रादौ माहात्म्यम्—

अत्र विष्णुपुराणे—

ततः प्रभवति ब्रह्मन् सर्व्वपापहरा सरित्।
गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा॥

महाभारते—

ते देशास्ते जनपदास्ते श्रमास्ते च पर्व्वताः।
येषां भागीरथी पुण्या मध्ये याति सरिद्वरा॥
तपसा ब्रह्मचर्य्येण यज्ञैस्त्यागेन वा पुनः।
तां गतिं न लभन्ते तु गङ्गां संसेव्य यां लभेत्॥
पूर्व्वे वयसि कर्म्माणि कृत्वा पापानि ये नराः।
शेषे गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम्॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः पुमान्।
मासमेकन्तु गङ्गायां समौ स्यातां नवा समौ॥
तप्यतेऽवाक्शिरा यस्तु युगानामयुतं पुमान्।
तिष्ठेद्यथेष्टं यश्चापि गङ्गायां स विशिष्यते॥
भूतानामिह सर्व्वेषां दुःखोपहतचेतसाम्।
गतिमन्वेषमाणानां न गङ्गासदृशी गतिः॥
प्रकृष्टैरशुभैर्ग्रस्तानेकैः पुरुषाधमान्।
पततो नरके गङ्गा संश्रितान् प्रेत्य तारयेत्॥

प्रेत्य पतत इति सम्बन्धः।

ते सन्नियुक्ता मुनिभिर्नृणां देवैः[1] सवासवैः।
येऽभिगच्छन्ति सततं गङ्गामभिमताम्बरैः (?)॥
न भयेभ्यो भयं तस्य न पापेभ्यो न राजतः।
आ देहपतनाद्गङ्गामुपास्ते यः पुमानिह॥

अन्धान् जड़ान् द्रव्यहीनांश्च गङ्गा
यशस्विनी बृहती विश्वरूपा।
देवैः सेन्द्रैर्मुनिभिर्दानवैश्च
निषेविता सर्व्वकामैर्युनक्ति॥

जड़ान्धप्रभृतयः कर्म्मानधिकारिणोऽपि गङ्गासेवया अभिमत-फलभागिनो भवन्तीत्यर्थः।

---

(१) ख पुस्तके—नूनं वेदैः समस्वरैः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मपुराणे—

षष्ठ्यादौ कृष्णपक्षे तु भूमौ सन्निहिता भवेत्।
यावत्पुण्यममावास्यां दिनानि दश नित्यशः॥
शुक्लप्रतिपदमारभ्य दिनानि दशसंख्यया।
पाताले सन्निधानन्तु करोति स्वयमेव हि॥
शुक्लैकादशीमारभ्य यावद्दशदिनानि तु।
पञ्चम्यन्तानि सा स्वर्गे भवेत्सन्निहिता सदा॥

पुण्यमिति षष्ठीतो दर्शान्तं गङ्गायां सातिशयं पुण्यं भवतीत्यर्थः।

भविष्यपुराणे—

कृते तु सर्व्वतीर्थानि त्रेतायां पुष्करं परम्।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गा विशिष्यते॥

ब्रह्माण्डपुराणे—

कलौ तु सर्व्वतीर्थानि स्वं स्वं वीर्य्यं स्वभावतः।
गङ्गायां प्रतिमुञ्चन्ति सा तु देवी न कुत्रचित्॥

वाराहे—

गङ्गाम्भःकणदिग्धस्य वायोः संस्पर्शनादपि।
पापशीला अपि नराः शुभां गतिमवाप्नुयुः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ गङ्गाजलमाहात्म्यम् ।

तत्र स्कन्दपुराणे—

योऽसौ सर्व्वगतो विष्णुश्चित्स्वरूपी जनार्द्दनः ।
स एव द्रवरूपेण गङ्गाम्भो नाऽत्र संशयः ॥

लिङ्गपुराणे—

ब्रह्महा गुरुहा गोघ्नः स्तेयी तु गुरुतल्पगः ।
गङ्गाम्भसा च पूयन्ते नाऽत्र कार्य्या विचारणा ॥

यमः—

चैत्रस्थमुद्धृतं वाऽपि शीतमुष्णमथापि वा ।
गाङ्गेयं हरते तोयं पापमामरणान्तिकम् ॥
वर्ज्यं पर्य्युषितं तोयं वर्ज्यं पर्य्युषितं दलम् ।
अवर्ज्यं जाह्नवीतोयमवर्ज्यं तुलसीदलम् ॥

महाभारते—

मेरोः समुद्रस्य च सर्व्वरत्नैः
संख्योपलानामुदकस्य वापि ।
गङ्गाजलानां न तु शक्तिरस्ति
वक्तुं गुणाख्यापरिमाणमत्र ॥

मत्स्यपुराणे—

तीर्थयात्राविधिं कृत्स्नमकुर्व्वाणोऽपि यो नरः[1] ।
गङ्गातोयस्य माहात्म्यात् सोऽप्यत्र फलभाग्भवेत् ॥

---

(१) ग पुस्तके—मानवः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	Rs.	
•Markandeya Purana, Fasc. 5-7 @ /10/ each	1	14
*Mīmāṁsā Darçana, Fasc. 10–19 @ /10/ each	6	4
Nyāyavārtika, Fasc. 1--6 @ /10/ each	3	12
*Nirukta, Vol. IV. fasc. 1-8 @ /10/ each	5	0
*Nitisara, Fasc. 3-5 @ /10/ each	1	14
Nityācārapaddhatiḥ, Fasc. 1--7 @ /10/ each	4	6
Nityācārapradīpaḥ Vol. I. Fasc. 1--8 ; Vol. II, Fasc. 1-3. @ /10/ each	6	14
Nyayabinduṭīkā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2--6 ; Vol. II, Fasc. 1--3 @ /10/ each	5	0
Nyayasarah	2	0
Padumawati, Fasc. 1--5 @ 2/	10	0
*Pariçiṣta Parvan, Fasc. 3--5 @ /10/ each	1	14
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Prithivirāj Rāsa. Part II, Fasc. 1--5 @ /10/ each	3	2
Ditto (English) Part II, Fasc. 1 @ 1/-	1	0
Prākrta Lakṣaṇam Fasc. 1 @ 1/8/ each	1	8
Parāçara Smṛti, Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--6 ; Vol. III, Fasc. 1--6 @ /10/ each	12	8
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraieca Kaha Fasc. 1-3, @ /10/	1	14
Sāṇkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
•Sankara Vijaya, Fasc. 2-3 @ /10/ each	1	4
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Sragdharā Stotra (Sanskrit and Tibetan)	2	0
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta fasc. 1	1	4
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
,, Pratisakhya, Fasc. 1-3 @ /10/ each	1	4
*Taitterīya Saṁhitā, Fasc. 27–45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10–19 @ /10/ each	6	14
Tantra Vārteka (English) Fasc. 1-8 @ 1/4/ each	10	0
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1--5, Part IV. Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc, 1, @ /10/ each	0	0
Ditto Prakas, fasc. 1-2, @ /10/ each	1	4
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, fasc, 1, @ /10/ each	0	10
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each	6	14
Vidhāna Pārijata, Fasc. 1-8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-4 @ 1/4/	3	12
Vivādaratnākara, Fasc. 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
*Yoga Aphorisms of Patanjali, Fasc. 3-5 @ /10/ each	1	14
Yogasāstra of Hemchandra Vol. I. Fasc. 1-3	3	12
Tibetan Series.		
Baudhyastotrasangraha, Vol. I (Tib. & Sans.)	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Ṭiñ, Fasc. 1--4 @ 1/- each	4	0
Rtogs *brjod d*pag *h*khri S'iñ (Tib. & Sans. Avadāña Kalpalatā) Vol. I, Fasc. 1--8 ; Vol. II. Fasc. 1--7 @ 1/- each	15	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6, @ 1/ each	14	0
Arabic and Persian Series.		
*Ālamgirnāmah, with Index, (Text) Fasc. 1--13 @ /10/ each	8	2
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	4	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each...	55	8

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Āīn-l-Akbarī, Fasc. 1-22 @ 1/8/ each 33 0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, ... 36 0
Ditto (English) Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-7 Vol 3 @ 1/4/ each 20 0
Arabic Bibliography, by Dr. A. Sprenger, @ /10/ 0 10
*Bādshāhnāmah, with Index, Fasc. 1--19 @ /10/ each 11 14
Conquest of Syria, Fasc. 1-9 @ /10/ each ... ... Rs. 5 10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each 2 0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1--3 @ 1/ each 3 0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each 31 8
Farnang-i-Rashīdī, Fasc. 1--14 @ 1/8/ each 21 0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ... 4 0
Futūh-ush-Shām of Wāqidī, Fasc. 1--9 @ /10/ each 5 10
Ditto of Āzādī, Fasc. 1--4 @ /10/ each 2 8
History of Gujarat 1 0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ... 0 12
Hisatory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each 7 8
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each 1 14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each 51 0
Ma'āṣir-i- Ālamgīrī, Fasc. 1--6 @ /10/ each 3 12
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each 35 0
Maghāzi of Wāqidī, Fasc. 1--5 @ /10/ each 3 2
Marhamu 'L-Ilali 'L-Mu'Dila 1 0
Muntakhabu-t-Tawārikh, Fasc. 1--15 @ /10/ each 9 6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III. Fasc 1 @ 1/ each 16 0
Muntakhabu-l-Lubāb, Fasc. 1--19 @ /10/ each 11 14
Ditto Part 3, Fasc. 1 ... ... 1 0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ 0 10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each 1 8
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott 5 0
Riyāẓu-s-Salātīn, Fasc. 1--5 @ /10/ each 3 2
Ditto (English) Fasc. 1--5 @ 1/ 5 0
Tadhkira-i-khushnavīsān 1 0
Tabaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each 14 0
Ditto Index 1 0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc. 1--7 @ /10/ each ... 4 6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif, Fasc. 1--6 @ /10/ each ... 3 12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each 3 0
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 @ 1/ 1 0
Wis-o-Rāmīn, Fasc. 1--5 @ /10/ each 3 2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--8 @ /10/ each 10 10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vols. XIX and XX @ 10/ each 20
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Assiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.

4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each 34 0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer, Asiatic Society," only.

<u>Books are supplied by V. P. P.</u>

16-5-11.